ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ / 1213 / 990 / છ, તા. 8-1-2014–થી મંજૂર

# SANSKRIT

## Standard 10

### प्रतिज्ञापत्रम्

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

Price : ₹ 44.00

तमसो मा ज्योतिर्गमय

Gujarat State Board of School Textbooks
'Vidyayan', Sector 10-A, Gandhinagar -382 010

© Gujarat State Board of School Textbooks, Gandhinagar
Copyright of this book is reserved by Gujarat State Board of School Textbooks. No reproduction of this book in whole or in part, in any form is permitted without written permission of the Director of the Board.

**Adviser**

Shri Sureshchandra J. Dave

**Authors**

Dr. Kamaleshkumar C. Choksi (Convenor)

Dr. Manasukh K. Moliya

Dr. Mohini D. Acharya

Shri Poornima L. Dave

Shri Maharudra K. Sharma

Shri Smitaben B. Joshi

**Translators**

Dr. D. R. Sharma

Shri Poornima L. Dave

**Reviewers**

Dr. Ramchandrabhai G. Prajapati

Shri Rohitbhai J. Khamar

Shri Harsaben B. Mehta

Dr. Shwetaben Jejurkar

**Artist**

Shilp Graphics

**Co-ordinator**

Shri Kishanbhai F. Vasava

(Subject co-ordinator : Gujarati-Sanskrit)

**Preparation and Planning**

Shri C. D. Pandya

(Dy. Director : Academic)

**Lay-out and Planning**

Shri Haresh S. Limbachiya

(Dy. Director : Production)

## PREFACE

In accordance with NCERT as well as NCF-2005, it has been necessary to bring change in new national curriculum, textbook and educational process. In that connection Gujarat State Secondary and Higher Secondary Board have prepared a new curriculum. With a feeling of pleasure, the Board presents this textbook to the students which is prepared according to the new syllabus of **Sanskrit** for **Standard 10** and approved by the Government of Gujarat.

In this textbook, linguistic, literary and cultural aspects of Sanskrit have been taken care of. Wherever necessary, considering the agegroup of the students, some lessons have been edited and some new lessons have been written. Sanskrit conversational aspects are also covered. All the (grammatical) terms are discussed in detail to get familiar with Sanskrit language. Various aspects of Sanskrit literature have been represented here. This textbook has been prepared with a vision to develop creativity, thinking power and reasoning ability in students which can lead them to their overall development and it can help in teaching-learning process too.

Before publishing this textbook, its manuscript has been reviewed with different points of view by the teachers teaching at this level and the subject experts. This textbook has been published only after incorporating the suggestions and corrections in the manuscript suggested by the teachers and experts. We acknowledge the contribution of all those who have put in ceaseless efforts and extended full co-operation in bringing out this textbook.

With a view to making this textbook interesting, useful and faultless the textbook board has taken every care. However, in order to improve upon the quality of this textbook, we welcome useful suggestions from all those interested in education.

| | |
|---|---|
| **Dr. Bharat Pandit** | **Dr. Nitin Pethani** |
| Director | Executive President |
| Date : 1-1-2014 | Gandhinagar |

First Edition : 2014

**Published by :** Bharat Pandit, Director, on behalf of Gujarat State Board of School Textbooks, 'Vidyayan', Sector 10-A, Gandhinagar

**Printed by :**

# FUNDAMENTAL DUTIES

It shall be the duty of every citizen of India * :

(a) to abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

(b) to cherish and follow the noble ideals which inspired our national struggle for freedom;

(c) to uphold and protect the sovereignty, unity and integrity of India;

(d) to defend the country and render national service when called upon to do so;

(e) to promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

(f) to value and preserve the rich heritage of our composite culture;

(g) to protect and improve the natural environment including forests, lakes, rivers and wildlife, and to have compassion for living creatures;

(h) to develop the scientific temper, humanism and the spirit of inquiry and reform;

(i) to safeguard public property and to abjure violence;

(j) to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement;

(k) to provide proper opportunities by parents or gardian for education to their children or the ward of 6 to 14 years of age.

* Constitution of India : Section 51-C

# INDEX


1. सं वदध्वम् 1
2. यद्भविष्यो विनश्यति 5
3. स्वस्थवृत्तं समाचर 10
4. जनार्दनस्य पश्चिमः सन्देशः 14
5. गुणवती कन्या 20
6. काष्ठखण्डः 26
7. सुभाषितकुसुमानि 31
8. साक्षिभूतः मनुष्यः 35
9. चक्षुष्मान् अन्ध एव 40
10. त्वमेका भवानि 44
11. यस्य जननं तस्य मरणम् 48
12. कलिकालसर्वज्ञो हेमचन्द्राचार्यः 53
13. गीतामृतम् 58
14. क इदं दुष्करं कुर्यात् 63
15. जयः पराजयो वा 69
16. अद्भुतं युद्धम् 74
17. स्वाभाविकं सादृश्यम् 79
18. मुक्तानि मुक्तकानि 83
19. सत्यं मयूरः 88
20. तथैव तिष्ठति 93

अभ्यास 1 : पुनरावर्तनम् क्रियापद-परिचयः च 97

अभ्यास 2 : विशेषण-प्रयोग-परिचयः 104

अभ्यास 3 : उपपद-विभक्ति-परिचयः 112

अभ्यास 4 : कृदन्त-परिचयः 114

अभ्यास 5 : समास-परिचयः 119

अभ्यास 6 : विसर्गसन्धि-परिचयः 122

# 1. सं वदध्वम्

Vedas are pre-eminent source of Indian knowledge and religious traditions. Four Vedas known as Rigveda, Yajurveda, Samaveda and Atharvaveda are in poetry form. The verses of Vedas are called Mantras. In these Mantras, there are many incantations (hymns of praise) through which advice is given.

For enhancing vedic ideas various learned poet devotees, being inspired by such vedic prayers, have composed many incantations and prayers in different popular metres. These prayers are also in poetry order and are called shlokas. Like Vedas, these shlokas are also composed keeping in mind the universal feelings. Not only that but the desire for welfare of every living being is also expressed. Two of such well-known prayers are presented here.

We have the tradition of having an invocation at the beginning of any work. Following the same tradition let us begin our learning of Sanskrit with these Mantras and shlokas. The mantra of Rigveda, selected in the lesson, preaches about social behaviour. Second Mantra, selected from Yajurveda, is a prayer for removing evils/vices, whereas in third Mantra of Atharvaveda an advice is given which should be a model of family life. The last two verses reveal the good wishes for the welfare of entire society and country.

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे सं जानाना उपासते ॥ 1 ॥ ऋग्वेदे : 10.191.2

विश्वानि देव सवितर्दुरितानि परा सुव ।
यद्भद्रं तन्नऽ आ सुव ॥ 2 ॥ यजुर्वेदे : 30.3



अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् ॥ 3 ॥ अथर्ववेदे 3.30.2

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥ 4 ॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितो मानवाः सन्तु निर्भयाः॥ 5 ॥

## Glossary

**Noun : (Masc.) अनुव्रतः** One, following a vow **निरामयः** free from disease, healthy **पर्जन्यः** rain.

**(Fem.) जाया** wife **पृथिवी** earth.

**(Neu.) दुरितम्** evil deed, vice

**Pronoun : वः** your **विश्वानि** **(n.)** all **यत्** **(n.)** which **तत्** **(n.)** it **नः** our **सर्वे** **(m.)** all **अयम्** **(m.)** this.

**Adjective : मधुमतीम् ( वाचम् )** to sweet / soft (speech) **क्षोभरहितः ( देशः )** free from anxiety, quiet, **मानवाः** human beings **निर्भयाः** fearless.

**Adverb : यथा** Just as, like that **मा** not.

**Compound : क्षोभरहितः ( क्षोभेन रहितः - तृतीया तत्पुरुष )**

**Root : (First Gana)** (Parasmaipada) **भू ( भवति )** to be **वद् ( वदति )** to speak, to say **दृश् > पश्य् ( पश्यति )** to see **वर्ष् ( वर्षति )** to rain.

## Notes

**1. Meaning : सम् गच्छध्वम्** (all of you) walk together **सम् वदध्वम्** (all of you) speak together **मनांसि** minds **सम् जानताम्** be similar/be like each other **भागम्** part (of oblation offered in Yajna) **पूर्वे** earlier **सम् जानानाः** of similar mind, having similar belief **उपासते** serve, accept **सवितः** O! Sun-god (vocative case) **परा सुव** (you) remove **आ सुव** (You) make one acquire **पितुः** of father **मात्रा** with mother **संमनाः** having similar mind / thinking **वाचम्** speech **शान्तिवाम्** peaceful, full of calmness **भद्राणि** beneficial matters/felings **कश्चित्** any one **काले** at regular interval, at proper time **दुःखभाग्** unhappy, distressed **सस्यशालिनी** full of crops, endowed with crops.

**2. Sandhi :** सवितर्दुरितानि (सवितः दुरितानि)। यद्भद्रम् (यत् भद्रम्)। तन्न आसुव (तत् नः आसुव)। पुत्रो मात्रा (पुत्रः मात्रा)। देशोऽयं क्षोभरहितो मानवाः (देशः अयम् क्षोभरहितः मानवाः)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) पूर्वे के सं जानानाः भागम् उपासते ? ○

(क) मनुष्याः (ख) असुराः (ग) देवाः (घ) सर्वे

(2) कविः किं याचते ? ○

(क) भद्रम् (ख) दुरितम् (ग) सुखम् (घ) धनम्

(3) जाया कीदृशीं वाचं वदतु ? ○

(क) ललिताम् (ख) शान्तिवाम् (ग) ज्ञानयुताम् (घ) शोभनाम्

(4) सर्वे कीदृशाः भवन्तु ? ○

(क) योगिनः (ख) मानिनः (ग) सुखिनः (घ) बलिनः

(5) पर्जन्यः कदा वर्षतु ? ○

(क) ह्यः (ख) अद्य (ग) श्वः (घ) काले

(6) हे देव ............... दुरितानि परासुव। ○

(क) अग्ने (ख) वरुण (ग) सवितर् (घ) वायो

(7) पुत्रः ............... अनुव्रतः भवतु। ○

(क) मित्रस्य (ख) मातुः (ग) पितुः (घ) स्वसुः

(8) ............... निरामयाः भवन्तु। ○

(क) पक्षिणः (ख) जन्तवः (ग) सर्वे (घ) पशवः

(9) सर्वे ............... पश्यन्तु। ○

(क) दुरितानि (ख) फलानि (ग) धनानि (घ) भद्राणि

(10) पृथिवी ............... भवतु। ○

(क) बलशालिनी (ख) सस्यशालिनी (ग) जलपूर्णा (घ) धनपूर्णा

**2. एकवाक्येन संस्कृतभाषया उत्तरत ।**

(1) पूर्वे देवाः कथं भागम् उपासते ?

(2) जाया कस्मै मधुमतीं वाचं वदतु ?

(3) मानवाः कीदृशाः सन्तु ?

(4) कः क्षोभरहितः भवतु ?

**3. रेखाङ्कितानां पदानां स्थाने प्रकोष्ठात् उचितं पदं प्रयुज्य प्रश्नवाक्यं रचयत ।**

(कदा, कः, कीदृशी, का)

(1) <u>जाया</u> मधुमतीं वाचं वदतु।

(2) <u>पुत्रः</u> मात्रा संमनाः भवतु।

(3) <u>काले</u> वर्षतु पर्जन्यः।

**4. आज्ञार्थस्य अन्यपुरुष-बहुवचनरूपाणि चिनुत ।**

| | | |
|---|---|---|
| भवतु | सन्तु | भवेत् |
| पश्यन्तु | वर्षतु | भवन्तु। |

**5. प्रश्नानाम् उत्तराणि आङ्ग्लभाषया लिखत ।**

(1) For what does Rishi request the Sun ?

(2) In what way should a wife talk with her husband ?

(3) What does Rishi expect for all ?

(4) What does the poet make understand to do to remain united ?

**6. मा कश्चिद् दुःखभाग् भवेत् -** Express the spirit of this maxim in your own words.

**7. श्लोकपूर्तिं कुरुत ।**

(1) सं गच्छध्वं ............... उपासते ॥

(2) सर्वे भवन्तु ............... भवेत् ॥

**Activity**

- Present these Mantras-Shlokas as prayer in school programmes.
- Collect similar Shlokas and Mantras.

•

# 2. यद्भविष्यो विनश्यति

Panchatantra and Hitopadesha are famous folk tale works in Sanskrit. In it, animals are the characters through which preaching of wisdom has been imparted in very simple and natural way. Right from children to old age, every one loves to listen to story. As one enjoys reading it, one finds easy to understand the moral inbuilt in the story.

The lesson presented here is prepared on the basis of both Panchatantra and Hitopadesha. Vishnusharma the author has written (composed) Panchatantra in five sections मित्रभेदम्, मित्रसंप्राप्ति, काकोलूकीयम्, लब्धप्रणाशम् and अपरीक्षितकारकम्। This story is taken from first section मित्रभेदम् (discord between friends). The writer of Hitopadesha is Narayana Pandit. There are four sections in Hitopadesha viz. मित्रलाभ, सुहृद्भेद, विग्रह and सन्धि। The present story is found in the fourth section सन्धि.

Here is a story of three fish-Anagatavidhata (अनागतविधाता), Pratyutpannamati (प्रत्युत्पन्नमति) and Yadbhavishya (यद्भविष्य). Anagatvidhata runs away to another lake to protect itself from fishermen. When Pratyutpannamati is caught in the net, it protects itself by finding the way (remedy) using its swift intellect. Third fish Yadbhavisya, thinking 'come what may', sits idle and ruins itself. The names given to all three fish suggest their nature.

A man should think about the remedy (cure) for forthcoming difficulties in advance and he should intellectually find out the way when he is in trouble. An idle and inactive person depending just on luck has to suffer like Yadbhavishya.

---

पुरा एकस्मिन् जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः यद्भविष्यश्चेति त्रयो मत्स्याः वसन्ति स्म। अथ कदाचित् तं जलाशयं दृष्ट्वा धीवरैः उक्तम् – ''अहो बहुमत्स्योऽयं ह्रदः। कदाचिद् अपि न अस्माभिः अन्वेषितः। तदद्य आहारवृत्तिः सञ्जाता। श्वः अत्रागम्य मत्स्यकूर्मादयो व्यापादयितव्याः इति निश्चयः।''



अथ तेषां तत्कुलिशोपमं वचनं समाकर्ण्य मत्स्याः परस्परं प्राहुः – ''श्रुतोऽयं धीवरालापः। अधुना अस्माभिः किं कर्तव्यम्।'' तत्र अनागतविधाता नाम मत्स्यः प्राह – ''नूनं प्रभातसमये धीवराः अत्रागम्य मत्स्यसंक्षयं करिष्यन्ति इति मम मनसि वर्तते। तन्न युक्तं साम्प्रतं क्षणमपि अत्र अवस्थातुम्। अस्माभिः रात्रौ एव किञ्चित् समीपं सरः गन्तव्यम्। अहं तावत् जलाशयान्तरं गच्छामि।''

अपरः प्रत्युत्पन्नमतिः प्राह – ''भविष्यदर्थे प्रमाणाभावात् कुत्र मया गन्तव्यम्। तदुत्पन्ने यथाकार्यं तदनुष्ठेयम्। तथा चोक्तम् – उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान्।''

ततो यद्भविष्येण उक्तम् – ''धीवराणां वचनमात्रेण पितृपैतामहिकस्य जलाशयस्य त्यागः न युज्यते। यदि आयुःक्षयोऽस्ति तदा अन्यत्र गतानामपि मृत्युः भविष्यति एव। उक्तं च –

यदभावि न तद्भावि भावि चेन्न तदन्यथा।
इति चिन्ताविषघ्नोऽयमगदः किं न पीयते॥''

अथ तयोः निश्चयं ज्ञात्वा अनागतविधाता निष्क्रान्तः सह परिजनेन। द्वौ इमौ तत्रैव जलाशये स्थितौ। अपरेद्युः धीवरैः आगत्य जलाशये जालं क्षिप्तम्। जालेन बद्धः प्रत्युत्पन्नमतिः मृतवद् आत्मानं संदर्श्य स्थितः। ततो जालाद् अपसारितः यथाशक्ति उत्प्लुत्य गम्भीरं नीरं प्रविष्टः। यद्भविष्यः धीवरैः प्राप्तः व्यापादितः च। अत एवोक्तम् –

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति॥

## Glossary

**Noun : (Masc.) जलाशयः** lake, pond **प्रत्युत्पन्नमतिः** name of fish (The word प्रत्युपन्न means sharp witted / one having quick-decision power) **यद्भविष्यः** name of fish (The word means believing in come what may/happen) **मत्स्यः** fish (m.) **धीवरः** fisherman **आलापः** conversation **ह्रदः** pond, lake **मृत्युः** death (used in masc. in Sanskrit language) **अगदः** medicine **परिजनः** kinsman, relative **कुलिशः** thunderbolt, a weapon of Indra.

**(Fem.) आहारवृत्तिः** means of meal / food.

**(Neu.) जालम्** net (used to catch fish) **नीरम्** water.

**Pronoun : एकस्मिन्** (m.) in one **तम्** (m.) to him **अस्माभिः** (m. n.) by us **तेषाम्** (m. n.) of them **मम** my **अपरः** another, second **मया** by me **यः** (m.) who **सः** (m.) he **तयोः** (m. n.) of both of them **इमौ** (m.) these two **एतौ** (m.) these two

**Adjective : बहुमत्स्यः अयम् ( ह्रदः )** this having many fish (pond/lake) **कुलिशोपमम् ( वचनम् )** which can be compared with thunderbolt (word / statement) **पितृपैतामहिकः ( जलाशयः )** related to forefathers (pond) **गम्भीरम् ( नीरम् )** deep (water).

**Adverb : पुरा** formerly **अथ** now (used in the sense of beginning) **अद्य** today **श्वः** tomorrow **अधुना** now/at present **मृतवत्** as if dead **यथाशक्ति** according to ability / capacity **अतः एव** therefore.

**Participle : ( सं.भू.कृ. ) दृष्ट्वा** seeing **समाकर्ण्य** listening **ज्ञात्वा** knowing **आगम्य** coming **संदर्श्य** showing **उत्प्लुत्य** jumping **( विध्यर्थ कृदन्त ) व्यापादयितव्याः** should be killed **कर्तव्यम्** should be done **गन्तव्यम्** should go **अनुष्ठेयम्** should be done/performed **( हेत्वर्थ कृदन्त ) अवस्थातुम्** to survive **( कर्मणि भू. कृ. ) उक्तम्** said **अन्वेषितः** searched/found **सञ्जाता** born/produced **निष्क्रान्तः** removed **स्थितौ** stood **क्षिप्तम्** threw **बद्ध** bound, trapped **अपसारितः** removed **प्रविष्टः** entered

**Root : First gana (Parasmaipada) वस्** to stay/dwell **( वसति ) गम् > गच्छ्** to go **( गच्छति )** (Atmanepada) **वृत्** to be **( वर्तते ) एध्** to glow, to prosper **( एधते ).**

**Compounds :** अनागतविधाता (न आगतम् – अनागतम्, नञ् तत्पुरुष), अनागतस्य विधाता – षष्ठी तत्पुरुष)। प्रत्युत्पन्नमतिः (प्रत्युत्पन्ना मतिः यस्य सः – बहुव्रीहि)। बहुमत्स्यः (बहवः मत्स्याः यस्मिन् सः – बहुव्रीहि)। आहारवृत्तिः (आहारस्य वृत्तिः – षष्ठी तत्पुरुष)। कुलिशोपमम् (कुलिशस्य उपमा यस्य सः, बहुव्रीहि)। धीवरालापः (धीवराणाम् आलापः – षष्ठी तत्पुरुष)। प्रभातसमये (प्रभातस्य समयः, तस्मिन् – षष्ठी तत्पुरुष)। मत्स्यसंक्षयम् (मत्स्यानां संक्षयः, तम् – षष्ठी तत्पुरुष)। जलाशयान्तरम् (अन्यः जलाशयः – जलाशयान्तरम्, कर्मधारय)। (प्रमाणाभावात् (प्रमाणानाम् अभावः, तस्मात् – षष्ठी तत्पुरुष)। आयुःक्षयः (आयुषः क्षयः – षष्ठी तत्पुरुष)।

[Dissolution of compounds (सामासिक विग्रह) given in the book is just to help in teaching.]

## Notes

**1. Meaning : अनागतविधाता** name of a fish (one, finding the remedy before difficulty arises.) **अस्माभिः अन्वेषितः** we have found out **आहारवृत्तिः सञ्जाता** means of meal is arranged **धीवरालापः** conversation between fishermen **मत्स्यसंक्षयम्** killing of fish **करिष्यन्ति इति मम मनसि वर्तते** I think that they will do **तत् न युक्तम्** it is not proper **साम्प्रतम्** at present **जलाशयान्तरम्** towards another lake **भविष्यदर्थे** for future **प्रमाणाभावात्** due to lack of evidence **यथाकार्यम्** according to work/need **उत्पन्नाम् आपदम्** to difficulty which has occured **समाधत्ते** solves, promises **चिन्ताविषघ्नः** one, ruined by poison in the form of worries **किम् न पीयते** why is not drunk.

**2. Sandhi :** यद्भविष्यश्चेति (यद्भविष्यः च इति)। त्रयो मत्स्याः (त्रयः मत्स्याः)। बहुमत्स्योऽयं ह्रदः (बहुमत्स्यः अयम् ह्रदः)। अत्रागम्य (अत्र आगम्य)। मत्स्यकूर्मादयो व्यापादयितव्याः (मत्स्यकूर्मादयः व्यापादयितव्याः)। श्रुतोऽयम् (श्रुतः अयम्)। अत्रागम्य (अत्र आगम्य)। तन्न युक्तम् (तत् न युक्तम्)। चोक्तम् (च उक्तम्)। यस्तु (यः तु)। आयुःक्षयोऽस्ति (आयुःक्षयः अस्ति)। चिन्ताविषघ्नोऽयमगदः (चिन्ताविषघ्नः अयम् अगदः)। तत्रैव (तत्र एव)। ततो जालात् (ततः जालात्)। अत एवोक्तम् (अतः एव उक्तम्)। द्वावेतौ (द्वौ एतौ)। यद्भविष्यो विनश्यति (यद्भविष्यः विनश्यति)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) धीवराणां वचनं कीदृशम् आसीत् ? ◯

(क) विषोपमम् (ख) अनलोपमम् (ग) कुलिशोपमम् (घ) कृतान्तोपमम्

(2) अन्यं जलाशयं गन्तुं कः मत्स्यः निश्चयं करोति ? ◯

(क) सर्वे (ख) अनागतविधाता (ग) यद्भविष्यः (घ) प्रत्युत्पन्नमतिः

(3) धीवरैः उक्तम्, अद्य अस्माकं वृत्तिः ............... । ◯

(क) सञ्जाता (ख) सञ्जातः (ग) सञ्जातिः (घ) सञ्जातम्

(4) अनागतविधाता ............... सह निष्क्रान्तः। ◯

(क) परिजनम् (ख) परिजनाय (ग) परिजनस्य (घ) परिजनेन

(5) प्रत्युत्पन्नमतिः प्राह, भविष्यदर्थे प्रमाणाभावात् कुत्र मया ............... । ◯

(क) गन्तुम् (ख) गतम् (ग) गन्तव्यम् (घ) गतः

(6) अनागतविधाता प्राह, अत्र क्षणमपि ............... न युक्तम्। ◯

(क) अवस्थातुम् (ख) अवस्थितः (ग) गन्तुम् (घ) अवगम्य

**2. एकवाक्येन संस्कृतभाषया उत्तरत ।**

(1) जलाशये के त्रयः मत्स्याः वसन्ति स्म ?

(2) अपरेद्युः धीवरैः जलाशये किं क्षिप्तम् ?

(3) कौ द्वौ मत्स्यौ जलाशये एव स्थितौ ?

(4) जालात् अपसारितः प्रत्युत्पन्नमतिः कीदृशं नीरं प्रविष्टः ?

(5) कः मत्स्यः धीवरैः व्यापादितः ?

**3. अधोलिखितानां कृदन्तानां प्रकारं लिखत ।**

(1) सञ्जाता ............... (2) अनुष्ठेयम् ...............

(3) समाकर्ण्य ............... (4) बद्धः ...............

(5) अवस्थातुम् ............... (6) गन्तव्यम् ...............

**4. समासप्रकारं लिखत ।**

(1) जलाशयः। ............... (2) बहुमत्स्यः। ...............

(3) धीवरालापः। ............... (4) प्रत्युत्पन्नमतिः। ...............

(5) प्रमाणाभावात्। ...............

**5. सन्धिविच्छेदं कुरुत ।**

(1) यद्भविष्यश्चेति। ...............

(2) श्रुतोऽयम् ...............

(3) प्रत्युत्पन्नमतिस्तथा ...............

6. रेखाङ्कितानां पदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।

(कदा, कस्मात्, कीदृशः, केन, कः, किम्)

(1) बहुमत्स्यः अयं ह्रदः।

(2) अस्माभिः रात्रौ एव समीपं सरः गन्तव्यम्।

(3) अनागतविधाता परिजनेन सह निष्क्रान्तः।

(4) प्रत्युत्पन्नमतिः जालात् अपसारितः।

(5) धीवरैः यद्भविष्यः व्यापादितः।

7. कथायाः क्रमानुसारेण वाक्यानि लिखत ।

(1) अहं तावज्जलाशयान्तरं गच्छामि।

(2) पितृपैतामहिकस्य जलाशयस्य त्यागः न युज्यते।

(3) प्रमाणाभावात् कुत्र मया गन्तव्यम्।

(4) श्वः अत्र आगम्य मत्स्यकूर्मादयो व्यापादयितव्याः।

(5) धीवरैः जलाशये जालं क्षिप्तम्।

(6) यद्भविष्यः धीवरैः प्राप्तः व्यापादितः च।

8. आङ्ग्लभाषायाम् उत्तरत ।

(1) What did fishermen think on seeing the lake ?

(2) What did fish tell one other on listening fishermen's conversation ?

(3) What was the opinion of अनागतविधाता ?

(4) Why did प्रत्युत्पन्नमति give the idea to go to another lake ?

(5) What does यद्भविष्य believe about leaving the lake ?

(6) What is the moral of this story ?

9. पात्रैः सह यथास्वम् उक्तिं संयोजयत ।

| क | ख |
|---|---|
| (1) धीवराः | (1) तदुत्पन्ने यथाकार्यं तदनुष्ठेयम्। |
| (2) अनागतविधाता | (2) श्रुतोऽयं धीवरालापः ? |
| (3) यद्भविष्यः | (3) अहो बहुमत्स्योऽयं ह्रदः। |
| (4) प्रत्युत्पन्नमतिः | (4) यदभावि न तद्भावि। |
| | (5) तन्न युक्तं साम्प्रतं क्षणमपि अत्र अवस्थातुम्। |

## Activity

- Read another stories of पञ्चतन्त्र and हितोपदेश.
- Collect the maxims/proverbs related to prevention is better than cure.
- With the help of internet watch and collect pictures of stories of पञ्चतन्त्र and हितोपदेश.

# 3. स्वस्थवृत्तं समाचर

Great poet Kalidasa has written in the fifth canto of कुमारसंभवम् that 'body is the first means of accomplishing duty'. This means even if a man has lots of things with him, but if he has no healthy physique all these things are useless.

Man has to make many efforts to keep himself healthy. One of them is day-to-day routine. If day-to-day routine is good, health remains good. The age-old learneds of Ayurveda and modern well-known scholars of Medical science unanimously agree to this point.

Ideal day-to-day routine of a man is presented here. This day-to-day routine does not include only the habit of eating-drinking, standing-sitting, walking-sleeping etc, but virtues like company of good person, respect towards elders, hard-working for acquiring knowledge, sticking to truth etc., which are believed to be moral ideals of human life. The study of imperative forms used in the lesson and the meaning expressed by them is also expected.

बाल उत्तिष्ठ शय्यातः स्वस्थवृत्तं समाचर ।
स्मर जगद्विधातारं ततः शुद्धं जलं पिब ॥ 1 ॥
शतं पदानि निष्क्रम्य शौचार्थं गच्छ सत्वरम् ।
फेनिलेन करौ कृत्वा शुद्धौ व्यायाममाचर ॥ 2 ॥
तैलं मर्दय काये त्वं ततः स्नानं समाचर ।
यथाविधि जलेनैव वस्त्रं स्वीयं प्रधावय ॥ 3 ॥
पूर्वाभिमुखमासीनः कुरु सन्ध्याविधिं तथा ।
वन्दस्व पितरौ नित्यं प्रातराशम् अशान च ॥ 4 ॥



पाठशालां समं मित्रैः गच्छ पाठं तथा पठ ।
एवं समादिशत् पुत्रं तातः पुत्रहिते रतः ॥ 5 ॥
त्यज दुर्जनसंसर्गं भज साधुसमागमम् ।
कुरु पुण्यमहोरात्रं स्मर नाम हरेः सदा ॥ 6 ॥
प्रविचार्योत्तरं देयं सहसा न वदेः क्वचित् ।
शत्रोरपि गुणाः ग्राह्या दोषास्त्याज्याः गुरोरपि ॥ 7 ॥
ध्येयं सनातनं ब्रह्म हेयं दुःखमनागतम् ।
कायिकं सुखमादेयं विधेयं जनसेवनम् ॥ 8 ॥

## Glossary

**Noun (Masc.) फेनिलः** Soap **करः** hand **कायः** body (This noun is used in masculine gender.) **सन्ध्याविधिः** Sandhyavidhi/a rite to worship god in the morning and evening (The rite is so called because it is performed during twilight of morning and evening and through this rite आत्मा gets assosiated/united with परमात्मा.) **प्रातराशः** breakfast **तातः** father

**(Fem.) : शय्या** bed/cot

**(Neu.) : वृत्तम्** behaviour **शतम्** hundred **पदम्** step **तैलम्** oil of sesamum (Til) **पुण्यम्** meritorious/good deed **ब्रह्म** the Supreme Being.

**Adjective : शुद्धम् ( जलम् )** pure (water) **शतम् ( पदानि )** hundred (steps) **स्वीयम् ( वस्त्रम् )** one's own (clothes) **सनातनम् ( ब्रह्म )** eternal (brahma) **अनागतम् ( दुःखम् )** (trouble) which has not come **कायिकम् ( सुखम् )** physical (happiness) **रतः** engrossed.

**Adverb : शय्यातः** from the bed **यथाविधि** as per rite, according to rite **तथा** in that manner **समम्** with **एवम्** in this way **सदा** always **सहसा** all of a sudden **क्वचित्** somewhere.

**Participle : ( सं.भू.कृ. ) निष्क्रम्य** going away **कृत्वा** doing **प्रविचार्य** thinking deeply **( विध्यर्थ कृ. ) देयम्** should be given **ग्राह्याः** should be accepted **त्याज्याः** should be abandoned **ध्येयम्** should be meditated upon **हेयम्** should be given up **आदेयम्** should be received **विधेयम्** should be done.

**Compound :** स्वस्थवृत्तम् (स्वस्थं च तत् वृत्तम् - कर्मधारय) जगद्विधातारम् (जगतः विधाता, तम् - षष्ठी तत्पुरुष)। शौचार्थम् (शौचेन अर्थः, तम् - तृतीया तत्पुरुष)। सन्ध्याविधिम् (सन्धायाः विधिः, तम् - षष्ठी तत्पुरुष)। पुत्रहिते (पुत्रेभ्यः हितम्, तस्मिन् - चतुर्थी तत्पुरुष)। दुर्जनसंसर्गम् (दुर्जनस्य संसर्गः, तम् - षष्ठी तत्पुरुष)। साधुसमागमम् (साधोः समागमः, तम् - षष्ठी तत्पुरुष)। अनागतम् (न आगतम् - नञ् तत्पुरुष)। जनसेवनम् (जनानां सेवनम् - षष्ठी तत्पुरुष)।

**Root : First gana (parasmaipada) उत् + स्था > तिष्ठ्** to stand, to rise **( उत्तिष्ठति )**। **स्मृ** to remember **( स्मरति )**। **पा > पिब्** to drink **( पिबति )**। **स्था > तिष्ठ्** to stand **( तिष्ठति )**। **सम् + आ + चर्** to behave/practise **( समाचरति )**। **प्र + धाव्** to wash/clean **( प्रधावति )**। **सम् + आ + दिश्** to order/comanand **( समादिशति )**। **भज्** to worship **( भजति )**।

**Atmanepada (First gana) वन्द्** to bow down **( वन्दते )**

## Notes

**1. Meaning :** **जगद्विधातारम्** to the creator of the world **शौचार्थम्** for cleansing/voiding of excrement **गच्छ** you go **मर्दय** you massage **प्रधावय** you clean properly **पूर्वाभिमुखम्** facing towards east **आसीनः** being seated **वन्दस्व पितरौ** you bow/salute to parents **अशान** you eat **एवम् समादिशत्** ordered thus **कुरु** you do **अहोरात्रम्** day and night **उत्तरं देयम्** reply should be given **वदेः** you should speak.

**2. Sandhi** जलेनैव (जलेन एव)। प्रविचार्योत्तरम् (प्रविचार्य उत्तरम्)। शत्रोरपि (शत्रोः अपि)। दोषास्त्याज्याः (दोषाः त्याज्याः)। गुरोरपि (गुरोः अपि)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) बालः किं समाचरेत् ? ◯

(क) भ्रमणम् (ख) स्वस्थवृत्तम् (ग) कार्यम् (घ) सौख्यम्

(2) किं कृत्वा स्नानं समाचरेत् ? ◯

(क) भोजनम् (ख) पठनम् (ग) तैलमर्दनम् (घ) व्यायामम्

(3) त्वं मित्रैः ............... पाठशालां गच्छ। ◯

(क) परितः (ख) समम् (ग) ऋते (घ) पुरतः

(4) शत्रोरपि गुणाः ............... । ◯

(क) ग्राह्याः (ख) त्याज्याः (ग) हेयाः (घ) ध्येयाः

(5) जनैः किं ध्येयम् ? ◯

(क) सुखम् (ख) दुःखम् (ग) ब्रह्म (घ) जनसेवनम्

(6) कथम् आसीनेन सन्ध्याविधिः करणीयः। ◯

(क) दक्षिणाभिमुखेन (ख) उत्तराभिमुखम् (ग) पश्चिमाभिमुखेन (घ) पूर्वाभिमुखम्

**2. एकवाक्येन संस्कृतभाषया उत्तरत ।**

(1) प्रातःकाले कं स्मरेत् ?

(2) कीदृशं जलं पिबेत् ?

(3) कीदृशः तातः पुत्रं समादिशत् ?

(4) कस्य संसर्गं त्यजेत् ?

(5) किं कृत्वा उत्तरं देयम् ?

### 3. पुरुषवचनानुसारं धातुरूपैः रिक्तस्थानानि पूरयत ।

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| (1) | उ. पु. | ............... | गच्छाव | ............... |
| | म. पु. | गच्छ | ............... | ............... |
| | अ. पु. | ............... | ............... | गच्छन्तु |
| (2) | उ. पु. | वन्दे | ............... | ............... |
| | म. पु. | ............... | ............... | वन्दध्वम् |
| | अ. पु. | ............... | वन्देताम् | ............... |

### 4. वचनानुसारं शब्दरूपैः रिक्तस्थानानि पूरयत ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | गुरोः | ............... | ............... |
| (2) | ............... | ............... | मित्रैः |
| (3) | काये | ............... | ............... |
| (4) | वस्त्रम् | ............... | ............... |

### 5. आङ्ग्लभाषायाम् उत्तरं लिखत ।

(1) Write your day-to-day routine on the basis of this poem.

(2) Change the verb used in potential mood in the poem into potential participle.

**Activity**

- Note down daily activities in your diary (दैनन्दिनी).
- Prepare a timetable of your daily routine.

## 4. जनार्दनस्य पश्चिमः सन्देशः

In Sanskrit literary field, great poet Bhasa is well-reputed for writing plays. He has written 13 plays which are known as भासनाटकचक्रम्. The excerpt presented here is taken from his one-act play दूतघटोत्कचम् which is one of these thirteen.

The theme of the excerpt is based on the Mahabharata. Battle of Mahabharata is going on in Kurukshetra and today Abhimanyu is unjustly killed in it. Hence Arjuna is very sad and has announced to kill them who had killed Abhimanyu. In this tragic situation, Shrikrishna thinks to try once again to prevent this war anyway. By putting forward the tragic incident of Abhimanyu's killing and the sorrowful situation of Pandavas (thereby) in front of Dhritarashtra and Duryodhana, Shrikrishna plans to convince Dhritarashtra. He selects Ghatotkacha as his envoy and sends (conveys) through him a message of treaty. But engrossed in the madness of war Duryodhana, his companions Shakuni and others are not ready to listen to the message of treaty. At last Ghatotkacha makes them listen to the final message of Shrikrishna.

The interesting dialogues of Ghatotkacha, an envoy, with Duryodhana and Shakuni, produces dramatic pleasure. Selecting Ghatotkacha a son of demoness as a character, Bhasa has successfully tried to create an impersssion of demonic tendency of Duryodhana on mind of audience. On one hand Ghatotkacha, son of demoness, behaves like a man and on other hand, Duryodhan, son of a human behaves like a demon. Bhasa, with his skilful dramatic art, has created beautiful contradiction here. At the end, the misbehaviour of Duryodhana becomes the cause of destruction of Kuru race, the whole of his race. The fact, one who does not accept the proposal of compromise (solution) ruins himself and his family is shown through this play.

---

**घटोत्कचः** - (प्रविश्य) अये अयम् अत्रभवान् धृतराष्ट्रः। अनार्यशतस्य उत्पादयिता। (उपसृत्य) पितामह ! अभिवादये घटोत्क.....। (इत्यर्धोक्ते) न न, अयम् अक्रमः। युधिष्ठिरादयश्च मे गुरवो भवन्तमभिवादयन्ति। पश्चात् घटोत्कचोऽहम् अभिवादये।

**धृतराष्ट्रः** - एहि एहि पुत्र !

**घटोत्कचः** - अहो कल्याणः खलु अत्रभवान्। कल्याणानां प्रसूतिं पितामहमाह भगवान् चक्रायुधः।

**धृतराष्ट्रः** - (आसनात् उत्थाय) किमाज्ञापयति भगवान् चक्रायुधः।

**घटोत्कचः** - न न न। आसनस्थेन एव भवता श्रोतव्यो जनार्दनस्य सन्देशः।

**धृतराष्ट्रः** - यदाज्ञापयति भगवान् चक्रायुधः। (उपविशति।)

**घटोत्कचः** - पितामह ! श्रूयताम्। हा वत्स ! अभिमन्यो ! हा वत्स ! कुरुकुलप्रदीप ! हा वत्स ! यदुकुलप्रवाल ! तव जननीं मातुलं मामपि परित्यज्य पितामहं द्रष्टुमाशया स्वर्गमभिगतोऽसि। पितामह ! एकपुत्रविनाशात् अर्जुनस्य तावत् ईदृशी खलु अवस्था, का पुनर्भवतो भविष्यति। ततः क्षिप्रम् इदानीम् आत्मबलाधानं कुरुष्व। यथा ते पुत्रशोकसमुत्थितोऽग्निर्न दहेत्प्राणमयं हविरिति।

**शकुनिः** - यदि स्याद्वाक्यमात्रेण निर्जितेयं वसुन्धरा
वाक्ये वाक्ये यदि भवेत्सर्वक्षत्रवधः कृतः ॥

**घटोत्कचः** - शकुनिरेष व्याहरति। भोः शकुने ! अक्षान् विमुच्य भव बाणयोग्यः।

**दुर्योधनः** - भो भोः प्रकृतिं गतः। वयमपि खलु रौद्राः राक्षसोग्रस्वभावाः।

घटोत्कचः - शान्तम् पापम् शान्तम् पापम्। राक्षसेभ्योऽपि भवन्त एव क्रूरतराः। कुतः -

न तु जतुगृहे सुप्तान् भ्रातॄन् दहन्ति निशाचराः

शिरसि न तथा भ्रातुः पत्नीं स्पृशन्ति निशाचराः ॥

दुर्योधनः - दूतः खलु भवान् प्राप्तो न त्वं युद्धार्थमागतः।

गृहीत्वा गच्छ सन्देशं न वयं दूतघातकाः ॥

घटोत्कचः - (सरोषम्) किं दूत इति मां प्रधर्षयसि। मा तावत् भोः। न दूतोऽहम्। प्रहरध्वं समाहताः।

(सर्वे उत्तिष्ठन्ति।)

धृतराष्ट्रः - पौत्र ! घटोत्कच ! मर्षयतु भवान्। मद्वचनावगन्ता भव।



घटोत्कचः - भवतु भवतु। पितामहस्य वचनात् दूतोऽहमस्मि। भो भो राजानः ! श्रूयतां जनार्दनस्य पश्चिमः सन्देशः।

धर्मं समाचर कुरु स्वजनव्यपेक्षां

यत्काङ्क्षितं मनसि सर्वमिहानुतिष्ठ ।

जात्योपदेश इव पाण्डवरूपधारी

सूर्यांशुभिः सममुपैष्यति वः कृतान्तः ॥

## Glossary

**Noun (Masc.) घटोत्कचः** Son of Bhima and Hidimba **पितामहः** grandfather (father's father) **चक्रायुधः** Krishna, one who wields discus as weapon **जनार्दनः** Krishna, destroyer of wicked persons **क्रूरतरः** very cruel **निशाचरः** demon **दूतघातकः** destroyer/killer of envoy **सूर्यांशुः** ray of the Sun **कृतान्तः** Yamaraja **दूतः**envoy/messenger.

**(Fem.) : वसुन्धरा** earth **प्रकृतिः** nature **अवस्था** plight/state

**(Neu.) : स्वर्गम्** heaven **जतुगृहम्** a house (made up of) of lacqur/sealing - wax

**Pronoun : अत्रभवान्** your Majesty **मे** my (optional form of मम) **भवन्तम्** (m.) to you **माम्** to me **भवतः** (m.) your **इयम्** (f) this **एषः** (m.) this **भवन्तः** (m.) you all **सर्वम्** (n.) everything.

**Adjective : पश्चिमः ( सन्देशः )** final (message) **आसनस्थेन भवता ( धृतराष्ट्रेण )** by you (Dhritarashtra) seated on the throne **कुरुकुलप्रदीप ! यदुकुलप्रवाल ! ( अभिमन्यो ! )** light of Kuru race ! scion of Yadu race (Abhimanyu) **ईदृशी ( अवस्था )** such (condition/state) **पुत्रशोकसमुत्थितः ( अग्निः )** rising from the grief of the son (fire) **प्राणमयम् ( हविः )** full of life (oblation) **रौद्राः राक्षसोग्रस्वभावाः ( वयम् )** terrible, possessing the fierce nature like demons (we) **समाहताः** gathered/all together **सुप्तान् ( भ्रातॄन् )** to (brothers), who were sleeping.

**Adverb : अये** Oh ! (adverb used to address some one in astonishment) **पश्चात्** thereafter **खलु** indeed **हा** alas ! (adverb expressing grief) **पुनः** again **ततः** then **इदानीम्** at present **इति** like this (used to indicate that the matter is presented as it is.) **यदि** if **भोः** O! Oh! (used for vocation.)

**Compound :** अनार्यशतस्य (आर्याणाम् शतम् (आर्यशतम्, षष्ठी तत्पुरुष), न आर्यशतम् - अनार्यशतम्, तस्य - नञ् तत्पुरुष)। अर्धोक्ते (अर्धम् उक्तस्य अर्धोक्तम्, तस्मिन् - षष्ठी तत्पुरुष)। युधिष्ठिरादयः (युधिष्ठिरः आदिः येषां ते - बहुव्रीहि)। चक्रायुधः (चक्रम् आयुधं यस्य सः - बहुवीहि)। धृतराष्ट्रः (धृतं राष्ट्रं येन सः - बहुव्रीहि)। कुरुकुलप्रदीपः (कुरोः कुलम् (कुरुकुलम्, षष्ठी तत्पुरुष), कुरुकुलस्य प्रदीपः - षष्ठी तत्पुरुष)। यदुकुलप्रवालः (यदोः कुलम् (यदुकुलम्, षष्ठी तत्पुरुष), यदुकुलस्य प्रवालः - षष्ठी तत्पुरुष)। एकपुत्रविनाशात् (एकः चासौ पुत्रः (एकपुत्रः, कर्मधारय), एकपुत्रस्य विनाशः, तस्मात् - षष्ठी तत्पुरुष)। आत्मबलाधानम् (आत्मनः बलम् (आत्मबलम्, षष्ठी तत्पुरुष), आत्मबलस्य आधानम् - षष्ठी तत्पुरुष)। पुत्रशोकसमुत्थितः (पुत्रस्य शोकः (पुत्रशोकः, षष्ठी तत्पुरुष), पुत्रशोकेन समुत्थितः - तृतीया तत्पुरुष)। सर्वक्षत्रवधः (सर्वः चासौ क्षत्रः (सर्वक्षत्रः, कर्मधारय), सर्वक्षत्राणां वधः - षष्ठी तत्पुरुष)। बाणयोग्यम् (बाणस्य योग्यम् - षष्ठी तत्पुरुष)। राक्षसोग्रस्वभावाः (राक्षसाणाम् इव उग्रः (राक्षसोग्रः, षष्ठी तत्पुरुष), राक्षसोग्रः स्वभावः येषां ते - बहुव्रीहि)। जतुगृहे (जतुनः गृहम्, तस्मिन् - षष्ठी तत्पुरुष)। युद्धार्थम् (युद्धेन अर्थः - युद्धार्थः, तम् - तृतीया तत्पुरुष)। दूतघातकाः (दूतस्य घातकः - दूतघातकः, ते - षष्ठी तत्पुरुष)। मद्वचनावगन्ता (मम वचनम् (मद्वचनम्, षष्ठी तत्पुरुष)। मद्वचनस्य अवगन्ता - षष्ठी तत्पुरुष)। जात्योपदेशः (जात्यस्य उपदेशः - षष्ठी तत्पुरुष)। सूर्यांशुभिः (सूर्यस्य अंशवः, तैः - षष्ठी तत्पुरुष)।

**Participle : ( सं.भू.कृ. ) प्रविश्य** entering **उपसृत्य** approaching, going near **उत्थाय** standing up **परित्यज्य** leaving **( हे. कृ. ) द्रष्टुम्** to see, for seeing.

**Root : Frist gana (Parasmaipada) उप + विश् ( उपविशति )** to sit **दह् ( दहति )** to burn

**Sixth gana (Parasmaipada) स्पृश् ( स्पृशति )** to touch **प्र + हृ ( प्रहरति )** to strike, to attack **वि + आ + हृ ( व्याहरति )** to say, to utter.

## Notes

**1. Meaning : अनार्यशतस्य** of (one) hundred ignoble sons **उत्पादयिता** producer/generator (here father) **अभिवादये** I bow down **घटोत्क...। इति अर्धोक्ते** when he uttered half name Ghototka **अयम् अक्रमः** this is not the proper order (way) **एहि एहि पुत्र !** come, son come **अहो कल्याणः खलु अत्रभवान्** Oh ! your Majesty is indeed noble **प्रसूतिम्** to producer **आह** has said **श्रूयताम्** listen

**आसनस्थेन** seated on throne **श्रोतव्यः** should listen **हा वत्स ! अभिमन्यो !** O ! son Abhimanyu **अभिगतः असि** you have gone **एकपुत्रविनाशात्** by ruin (killing) of one son **क्षिप्रम्** quickly **आत्मबलाधानम् कुरुष्व** you summon up strength in your soul. **वाक्यमात्रेण** by mere words **सर्वक्षत्रवधः** killing/slaughter of all Kshatriyas **बाणयोग्यम्** befitting archery **प्रकृतिं गतः** displayed his original nature **शान्तं पापम्** oh, no ! how can it be. (This phrase is used in Sanskrit language when the listener does not find it worthy to listen the words spoken by the speaker. It can be interpreted as 'Don't say so'.) **प्रधर्षयसि** you are insulting me. **मा तावत् भोः** it cannot be like that **प्रहरध्वम्** you (all together) strike/attack **मर्षयतु भवान्** you please pardon/forgive **मद्वचनावगन्ता भव** understand my words **कुरु स्वजनव्यपेक्षाम्** you fulfil the expectations of your relatives/kinsmen **काङ्क्षितं मनसि** whatever desired in mind **सर्वम् इह अनुतिष्ठ** enjoy all here **जात्योपदेशः इव** as it is the preaching of life - family **जात्य** = noble family **पाण्डवरूपधारी** in the guise of Pandava (Arjuna) **उपैष्यति** will approach **वः** to you, for you.

**2. Sandhi :** युधिष्ठिरादयश्च (युधिष्ठिरादयः च)। गुरवो भवन्तम् (गुरवः भवन्तम्)। घटोत्कचोऽहम् (घटोत्कचः अहम्)। श्रोतव्यो जनार्दनस्य (श्रोतव्यः जनार्दनस्य)। स्वर्गमभिगतोऽसि (स्वर्गम् अभिगतः असि)। पुनर्भवतो भविष्यति (पुनः भवतः भविष्यति)। पुत्रशोकसमुत्थितोऽग्निर्न (पुत्रशोकसमुत्थितः अग्निः न)। हविरिति (हविः इति)। शकुनिरेष व्याहरति (शकुनिः एषः व्याहरति)। राक्षसेभ्योऽपि (राक्षसेभ्यः अपि)। भवन्त एव (भवन्तः एव)। प्राप्तो न (प्राप्तः न)। दूत इति (दूतः इति)। दूतोऽहम् (दूतः अहम्)। जात्योपदेश इव (जात्योपदेशः इव)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) यदुकुलप्रवालः कः ? ◯

(क) घटोत्कचः (ख) अर्जुनः (ग) अभिमन्युः (घ) दुर्योधनः

(2) अभिमन्युः कस्य पुत्रः आसीत् ? ◯

(क) जनार्दनस्य (ख) धृतराष्ट्रस्य (ग) अर्जुनस्य (घ) शकुनेः

(3) अभिमन्योः मातुलः कः ? ◯

(क) दुर्योधनः (ख) शकुनिः (ग) जनार्दनः (घ) घटोत्कचः

(4) 'शान्तं पापम् शान्तं पापम्।' इति कः वदति ? ◯

(क) घटोत्कचः (ख) धृतराष्ट्रः (ग) शकुनिः (घ) अर्जुनः

(5) 'वयं दूतघातकाः न।' – इदं वाक्यं केन कथितम् ? ◯

(क) दुर्योधनेन (ख) घटोत्कचेन (ग) शकुनिना (घ) धृतराष्ट्रेण

(6) चक्रायुधः कः ?

(क) अभिमन्युः (ख) जनार्दनः (ग) धृतराष्ट्रः (घ) शकुनिः

(7) भवन्तः ............... अपि क्रूरतराः।

(क) राक्षसान् (ख) राक्षसैः (ग) राक्षसेभ्यः (घ) राक्षसेषु

(8) कृतान्तः शब्दस्य कः अर्थः ?

(क) पांडवः (ख) सूर्यः (ग) यमराजः (घ) नष्टः

## 2. एकवाक्येन संस्कृतभाषायाम् उत्तरत ।

(1) घटोत्कचः कस्य सन्देशं नयति ?

(2) अभिमन्युः कं द्रष्टुं स्वर्गम् अभिगतः ?

(3) कुत्र सुप्तान् भातृन् निशाचराः न दहन्ति ?

(4) घटोत्कचः कस्य वचनात् दूतः भवति ?

## 3. कृदन्तानां प्रकारं लिखत ।

(1) श्रोतव्यः ............... (2) परित्यज्य ...............

(3) अभिगतः ............... (4) उपसृत्य ...............

(5) द्रष्टुम् ............... (6) काङ्क्षितम् ...............

## 4. सन्धिविच्छेदं कुरुत ।

(1) घटोत्कचोऽहम् ...............

(2) शकुनिरेषः ...............

(3) दूतोऽहमस्मि ...............

(4) दूत इति ...............

## 5. समासप्रकारं लिखत ।

(1) कुरुकुलप्रदीपः ............... (2) चक्रायुधः ...............

(3) पुत्रशोकसमुत्थितः ............... (4) धृतराष्ट्रः ...............

## 6. रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।

(कस्य, केन, कीदृशाः, कम्, किमर्थम्)

(1) घटोत्कचः <u>पितामहम्</u> अभिवादयति।

(2) त्वं <u>युद्धार्थं</u> न आगतः।

(3) वयं <u>दूतघातकाः</u> न।

(4) <u>जनार्दनस्य</u> पश्चिमः सन्देशः श्रोतव्यः।

**7. उदाहरणानुसारं नामरूपस्य परिचयं कारयत ।**

| | शब्द | लिङ्ग | विभक्ति | वचन |
|---|---|---|---|---|
| उदाहरणम् – वचनात् | वचन | नपुंसकलिंग | पञ्चमी | एकवचन |
| (1) अंशुभिः | ............... | ............... | ............... | ............... |
| (2) शकुनेः | ............... | ............... | ............... | ............... |
| (3) आशया | ............... | ............... | ............... | ............... |
| (4) पितामहम् | ............... | ............... | ............... | ............... |
| (5) राक्षसेभ्यः | ............... | ............... | ............... | ............... |

**8. धातुरूपाणां परिचयं कारयत ।**

| धातुरूपम् | धातु | पद | काल | पुरुष | वचन |
|---|---|---|---|---|---|
| गच्छ | गम् | परस्मैपद | आज्ञार्थ | मध्यम | एकवचन |
| (1) प्रहरध्वम् | ............... | ............... | ............... | ............... | ............... |
| (2) दहेत् | ............... | ............... | ............... | ............... | ............... |
| (3) भवतु | ............... | ............... | ............... | ............... | ............... |
| (4) समाचर | ............... | ............... | ............... | ............... | ............... |

**9. कोष्ठगतपदानि प्रयुज्य वाक्यानि रचयत ।**

(1) Dhritarashtra was the father of Kauravas.
(धृतराष्ट्र कौरव जनक अस् ।)

(2) Ghatotkacha brings the message of Janardana.
(घटोत्कच जनार्दन सन्देश आ + नी–नय्)

(3) We are not the killer of an envoy.
(अस्मद् दूतघातक न ।)

(4) Ghatotkacha bows to Dhritarashtra.
(घटोत्कच धृतराष्ट्र प्र + नम्)

**10. आङ्ग्लभाषायाम् उत्तराणि लिखत ।**

(1) What does Ghatotkacha advise Shakuni to do ?

(2) Why does Ghatotkacha call Duryodhana more cruel than a demon ?

(3) Describe Arjuna's lamentation on Abhimanyu's death.

**11. आङ्ग्लभाषायाम् संक्षिप्तं टिप्पणं लिखत ।**

(1) Characterisation of Ghatotkacha.

(2) Message conveyed by Shrikrishna.

**Activity**

- Read and enact this play. OR Enact this play orally.
- Get and watch C.D. available of the plays written by Bhasa.

# 5. गुणवती कन्या

Poet Dandi is well-known as prose-writer in Sanskrit literature. He has written a prose-work named दशकुमारचरितम्. Its theme is imaginative. Ten Kumaras, as it was decided, start travelling in ten different directions. During the journey, whatever every Kumara has experienced is described in ten उच्छ्वासs (sections) of this work. In the sixth उच्छ्वास, Mantragupta describes his own experiences of journey. At this juncture, he narrates the story of Shaktikumara. This story has been edited and presented here in brief.

Man and woman are two wheels of a chariot in the form of household life. As it is essential to have both the wheels of a chariot similar in shape and size, similarly man and woman working (acting) as wheels of house hold-chariot should also be similar in thought and virtues. Shaktikumara, the hero of the story, is endowed with good qualities. Hence, he wants to marry a girl, having good qualities similar to him. He has made a plan to find out a qualitative girl of his own choice. As per his plan, a girl who can prepare and feed various food items from only one प्रस्थ (about 2kgs.) paddy is a virtuous girl. After finding such a girl, he would put a proposal (of) marriage and if she agrees he will marry her.

Shaktikumara, who was moving in different countries in search of a virtuous girl, finds one girl, living in Kanchinagar situated on the bank of river Kavery. The girl, using her extraordinary intellect, prepares various food items and pleases Shaktikumara by feeding him those items with love. Thus the girl succeeds in the test. Shaktikumara puts a proposal of marriage and marries her after her consent. The moral of the story is that in spite of want of things, a good (virtuous) person with excellent skill can get desired happiness. Active past participles used in this lesson are also to be noted.

काञ्चीनगरे शक्तिकुमारो नाम एकः श्रेष्ठिपुत्रः प्रतिवसति स्म। स यदा स्वकीयस्य जीवनस्य द्वाविंशतितमे वर्षे प्रविष्टस्तदा चिन्तामापन्नः – नास्ति दारविहीनानाम् अननुरूपगुणदाराणां च सुखम्। तत्कथं गुणवतीं भार्याम् अहं विन्देयमिति।

ततः स प्रभूतं विचार्य वस्त्रान्ते पिनद्धशालिः दारग्रहणाय विविधान् देशान् अभ्रमत्। एकदा स कावेरीतीरपत्तने समागतः। अत्र सः कूपे विरलभूषणां कुमारीमेकाम् अपश्यत्। तस्याः रूपसम्पदाभिभूतः सोऽचिन्तयत् – आकृष्टं मे हृदयम् अस्याम्। तदेतां परीक्ष्य विवाहप्रस्तावं कृत्वा, तस्याम् सम्मतौ उद्वहामि। स तां निकषा संगत्य सविनयम् आह – अस्ति ते कौशलं शालिप्रस्थेन अनेन सम्पन्नमाहारं मां भोजयितुम् ?

ततः सा ओमिति उक्त्वा प्रस्थमात्रं धान्यमादाय श्रेष्ठिपुत्रस्य याचनानुसारं कर्तुं प्रवृत्ता।



ततः आदौ सा बुद्धिमती कन्या तान् शालीन् प्रथमम् आतपे तप्तवती। ततः समायां परिशुद्धायां भूमौ तान् अघट्टयत् । अनेन तुषेभ्यस्तण्डुलाः पृथक् सञ्जाताः।

तण्डुलान् सम्प्राप्य सा तुषान् भूषणानां मार्जनार्थं स्वर्णकाराय विक्रेतुं धात्रीम् अकथयत्। तस्मात् यत् धनं मिलति, तेन काष्ठानि आहर इति च धात्रीं निवेदितवती।

धात्री काष्ठानि आनीतवती। तदनन्तरं सा तण्डूलान् असकृत् जलेन प्रक्षालितवती, उष्णीकृते जले च तान् प्रक्षिप्तवती। अल्पीयसा कालेनैव तण्डुलाः सिद्धाः सञ्जाताः। ततः इन्धनानि जलेन शमयित्वा कृष्णाङ्गारानपि तदर्थिभ्यः प्रेषयित्वा यत् धनं लब्धं तेन धनेन शाकं घृतं दधि तैलं च क्रीतवती। तेन च सा विविधानि व्यञ्जनानि सम्पादितवती।

सम्पन्ने आहारे सा कन्या धात्रीमुखेन अतिथये प्रथमं स्नातुं निवेदितवती। ततः स्नानशुद्धाय तस्मै अतिथये सा पेयोपाहारपूर्वं भोजनं घृतसहितम् ओदनं व्यञ्जनञ्च अयच्छत्।

मध्ये मध्ये सा भोज्यादीनां विविधानां पदार्थानां वर्णनं कृत्वा अतिथेः भोजनरुचिमपि अवर्धयत्। भुक्ते तु तस्मिन् अतिथौ तया ताम्बूलस्यापि व्यवस्था कृता। एवं स्वकीयया गुणसम्पदा प्रस्थपरिमितेन धान्येन विविधानि व्यञ्जनानि विरचितवतीं कन्यां प्रति समाकृष्टः शक्तिकुमारः विवाहस्य प्रस्तावं कृतवान्। कन्यया स्वीकृते प्रस्तावे तां विधिवदुपयम्य स्वनगरमनयत्।

## Glossary

**Noun : (Masc.)** **श्रेष्ठिपुत्रः** son of a merchant **दाराः** wife (noun दार in masculine gender always used in plural and gives feminine meaning - wife) **तण्डुलः** rice-grains **तुषः** husk of grains **आतपः** sunshine **स्वर्णकारः** goldsmith **कृष्णाङ्गारः** coal **प्रस्तावः** proposal.

**(Fem.) :** **भार्या** wife **सम्मतिः** permission, cosent **शालि** paddy **धात्री** nurse

**(Neu.) :** **काञ्चीनगरम्** ancient city/town situated in South India **कौशलम्** skill, cleverness **धान्यम्** grain **काष्ठम्** wood **इन्धनम्** fuel **शाकम्** vegetable **घृतम्** ghee **दधि** curd **व्यञ्जनम्** food item

**Pronoun :** **एकः** (m.) one **तस्याः** (f.) her **एताम्** (f.) to this **ताम्** (f.) to her **ते** your (optional form of तव) **अनेन** (m.) by/with this **सा** (f.) she **तान्** (m.) to them **तस्मात्** (m.n.) from it **तेन** (m.) by him **तस्मै** (m.n.) for him/it **तस्मिन्** (m.n.) in it **तया** (f) by her

**Adjective :** **स्वकीयस्य ( जीवनस्य )** of one's own (life) **द्वाविंशतितमे ( वर्षे )** in the twenty second (year) **गुणवतीम् ( भार्याम् )** to virtuous/having good qualities (wife) **विरलभूषणाम् एकाम् ( कुमारीम् )** to one having less ornaments (girl) **सम्पन्नम् ( आहारम् )** cooked (prepared) (meal) **प्रस्थमात्रम् ( धान्यम् )** just one Prastha (round about two kilograms) grain **बुद्धिमती** highly intelligent **समायाम् परिशुद्धायाम् ( भूमौ )** on levelled and clean (ground/soil) **उष्णीकृते ( जले )** in hot (water) **अल्पीयसा ( कालेन )** within short (time) **सम्पन्ने ( आहारे )** when (food) was prepared **स्नानशुद्धाय तस्मै ( अतिथये )** to that (guest) who had taken bath **विविधानाम् ( पदार्थानाम् )** of various (food items) **प्रस्थपरिमितेन ( धान्येन )** with (grain) measuring one Prastha.

**Adverb :** **यदा** when **तदा** then **एकदा** once, one day **निकषा** near **ओमिति** saying Om (yes)-Word Om in Sanskrit language conveys the meaning of acceptance (yes). **असकृत्** very often.

**Compounds :** श्रेष्ठिपुत्रः (श्रेष्ठिनः पुत्रः - षष्ठी तत्पुरुष)। दारविहीनानाम् (दारैः विहीनः, तेषाम्-तृतीया तत्पुरुष)। अननुरूपगुणदाराणाम् (न अनुरूपम् - अननुरूपम्, नञ् तत्पुरुष। अननुरूपं गुणाः यस्याः सा अननुरूपगुणा, बहुव्रीहि) अननुरूपगुणा च अमी दाराः अननुरूपगुणदाराः, तेषाम् - अननुरूपगुणदाराणाम् - बहुव्रीहि)। वस्त्रान्ते (वस्त्रस्य अन्तः, तस्मिन् - षष्ठी तत्पुरुष)। पिनद्धशालिः (पिनद्धा शालिः येन सः - बहुव्रीहि)। दारग्रहणाय (दाराणां ग्रहणम् - षष्ठी तत्पुरुष)। कावेरीतीरपत्तने (कावेर्याः तीरम् - कावेरीतीरम्, षष्ठी तत्पुरुष) कावेरीतीरस्य पत्तनम्,

तस्मिन – षष्ठी तत्पुरुष)। विरलभूषणाम् (विरलं भूषणं यस्याः सा, ताम् – बहुव्रीहि)। रूपसम्पदा (रूपस्य सम्पद्, तया – षष्ठी तत्पुरुष)।, विवाहप्रस्तावम् (विवाहस्य प्रस्तावः, तम् – षष्ठी तत्पुरुष)। शालिप्रस्थेन (शालीनाम् प्रस्थः, तेन – षष्ठी तत्पुरुष)। स्वगृहम् (स्वस्य गृहम् – षष्ठी तत्पुरुष)। प्रक्षालितपादम् (प्रक्षालितौ पादौ येन सः, तम् – बहुव्रीहि)। कृष्णाङ्गारान् (कृष्णः च असौ अङ्गारः कृष्णाङ्गारः, तान् – कर्मधारय)। धात्रीमुखेन (धात्र्याः मुखम्, तेन – षष्ठी तत्पुरुष)। स्नानशुद्धाय (स्नानेन शुद्धः, तस्मै – तृतीया तत्पुरुष)। पेयोपाहारपूर्वम् पेयस्य उपाहारः – षष्ठी तत्पुरुष, पेयोपाहारः पूर्वं यस्य तद् – बहुव्रीहि)। घृतसहितौदनम् (घृतेन सहितम् घृतसहितम्, तृतीया तत्पुरुष), घृतसहितं च तद् ओदनम्, घृतसहितौदनम् – कर्मधारय)। भोजनरुचिम् (भोजने रुचिः – सप्तमी तत्पुरुष)। गुणसम्पदा (गुणानां सम्पद्, तया – षष्ठी तत्पुरुष)। प्रस्थपरिमितेन (प्रस्थेन परिमितम्, तेन – तृतीया तत्पुरुष)। स्वनगरम् (स्वस्य नगरम् – षष्ठी तत्पुरुष)।

**Participle : ( सं.भू.कृ. ) उक्त्वा** saying, talking **आदाय** acquiring **सम्प्राप्य** taking **शमयित्वा** extinguishing **प्रेषयित्वा** sending **( क.भू.कृ. ) प्रविष्टः** entered **आपन्नः** fallen into **समागतः** arrived **अभिभूतः** defeated **कृता** did **समाकृष्टः** lured **आकृष्टम्** attracted **( कर्तरि भू.कृ. ) तप्तवती** heated **उक्तवती** said/spoke **निवेदितवती** informed **प्रक्षालितवती** washed/cleaned **प्रक्षिप्तवती** threw/put **क्रीतवती** bought **सम्पादितवती** prepared **वर्धितवती** made/prepared **विरचितवती** made, composed **कृतवान्** did. **( हे.कृ. ) भोजयितुम्** to make one eat **विक्रेतुम्** for selling **स्नातुम्** for bathing

**Root : first Gana (Parasmaipada) प्रति + वस्** to stay, to live **( प्रतिवसति ) भ्रम्** to wander, to move **( भ्रमति ) उत् + वह्** to marry **( उद्वहति ) नी** to take, to lead **( नयति )**

**Sixth Gana (Parasmaipada) मिल्** to meet **( मिलति )**

(Atmanedpada) **विन्द्** to obtain, to gain **( विन्दते )**

**Tenth Gana (Parasmaipada) चिन्त्** to think **( चिन्तयति ) घट्ट्** to rub **( घट्टयति )**

## Notes

**1. Meaning : चिन्तामापन्नः** started worrying **अननुरूपगुणदाराणाम्** to those, having wife devoid of suitable (favourable) virtues **विन्देयम्** I may get **प्रभूतम् विचार्य** having thought deeply **वस्त्रान्ते** at the end of clothes **पिनद्धशालिः** he, who has tied paddy **दारग्रहणाय** to get a wife **रूपसम्पदाभिभूतः** impressed by prosperity in the form of beauty **तदेताम्** so her **सत्याम् सम्मतौ** if she agrees **एनाम् उद्वहामि** I will marry her **आह** spoke **शालिप्रस्थेन** with one Prastha paddy **ओमिति उक्त्वा** saying Om, accepting **आतपे तप्तवती** heated in sunshine **तान् अघट्टयत्** rubbed, grinded it **मार्जनार्थम्** to clean, to wash **धात्रीमुक्तवती** said to wet-nurse **आहर** bring **जलेन प्रक्षालितवती** washed with water **सिद्धाः सञ्जाताः** were cooked **इन्धनानि शमयित्वा** extinguishing wood **कृष्णाङ्गारान्** to coals **तदर्थिभ्यः** for these who need it **धात्रीमुखेन** through wet-nurse **पेयोपाहारपूर्वम्** with drinks and snacks **घृतसहितौदनम्** rice cooked with ghee **भुक्ते तु तस्मिन् अतिथौ** when the guest completed his meal **व्यञ्जनानि** food items **ताम्बूलस्यापि** also of a betel **गुणसम्पदा** with richness of qualities **कन्याम् प्रति** towards girl **कन्यया स्वीकृते प्रस्तावे** when the girl accepted the proposal **विधिवत्** according to rites **उपयम्य** marrying.

**2. Sandhi :** शक्तिकुमारो नाम (शक्तिकुमारः नाम)। स यदा (सः यदा)। प्रविष्टस्तदा (प्रविष्टः तदा)। सोऽचिन्तयत् (सः अचिन्तयत्)। स ताम् (सः ताम्)। तुषेभ्यस्तण्डुलाः (तुषेभ्यः तण्डुलाः)। कालेनैव (कालेन एव)। व्यञ्जनञ्च (व्यञ्जनं च)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) कस्मिन् वर्षे प्रविष्टः शक्तिकुमारः चिन्तामापन्नः। ◯

(क) द्वाविंशतितमे (ख) विंशतितमे (ग) एकविंशतितमे (घ) चतुर्विंशतितमे

(2) श्रेष्ठिपुत्रः किमर्थं देशम् अभ्रमत् ? ◯

(क) धनार्जनार्थम् (ख) विद्याग्रहणाय (ग) दारग्रहणाय (घ) धनग्रहणाय

(3) बुद्धिमती कन्या शालीन् कुत्र तप्तवती ? ◯

(क) अग्नौ (ख) आतपे (ग) चत्वरे (घ) समानायां भूमौ

(4) तुषान् विक्रीय धात्री किम् आनीतवती ? ◯

(क) घृतम् (ख) काष्ठानि (ग) जलम् (घ) शाकम्

(5) कन्या धात्रीमुखेन अतिथिं प्रथमं किं निवेदितवती ? ◯

(क) प्रतीक्षाकरणाय (ख) आसनग्रहणाय (ग) भोजनाय (घ) स्नानाय

(6) इन्धनानि जलेन शमयित्वा कन्या किं प्राप्तवती ? ◯

(क) कृष्णाङ्गारान् (ख) काष्ठानि (ग) जलम् (घ) शाकम्

(7) भोजनान्ते कन्यया कस्य व्यवस्था कृता ? ◯

(क) शयनस्य (ख) ताम्बूलस्य (ग) तक्रस्य (घ) मिष्टान्नस्य

(8) कन्या विविधं व्यञ्जनं केन विरचितवती ? ◯

(क) स्वकीयेन बुद्धिबलेन (ख) क्रीतेन इन्धनेन

(ग) प्रस्थपरिमितेन धान्येन (घ) स्वकीयेन धनेन

**2. एकवाक्येन संस्कृतभाषायाम् उत्तरत ।**

(1) श्रेष्ठिपुत्रस्य नाम किम् आसीत् ?

(2) देशान् भ्रमन् एकदा शक्तिकुमारः कुत्र समागतः ?

(3) शक्तिकुमारः विरलभूषणां कुमारीं कुत्र अपश्यत् ?

(4) कन्या तण्डूलान् केन प्रक्षालितवती ?

(5) भोज्यादीनां पदार्थानां वर्णनं कृत्वा कन्या किं कृतवती ?

**3. कृदन्तप्रकारं लिखत ।**

(1) प्रविष्टः ............... (2) आकृष्टम् ...............
(3) भोजयितुम् ............... (4) उक्त्वा ...............
(5) आदाय ............... (6) निवेदितवती ...............

**4. सन्धिविच्छेदं कुरुत ।**

(1) प्रविष्टस्तदा ...............
(2) सोऽचिन्तयत् ...............
(3) तुषेभ्यस्तण्डुलाः ...............
(4) व्यञ्जनञ्च ...............

**5. समासप्रकारं लिखत ।**

(1) दारविहीनानाम् ............... (2) घृतसहितम् ...............
(3) पिनद्धशालिः ............... (4) विरलभूषणाम् ...............
(5) शालिप्रस्थेन ............... (6) कृष्णाङ्गारान् ...............
(7) गुणसम्पदा ............... (8) स्वनगरम् ...............

**6. उदाहरणानुसारं शब्दरूपं लिखत ।**

| | शब्द | लिङ्ग | विभक्ति | वचन |
|---|---|---|---|---|
| उदाहरणम् - वचनात्। | वचन | नपुंसकलिङ्ग | पञ्चमी | एकवचन |
| (1) काञ्चीनगरे | ............... | ............... | ............... | ............... |
| (2) जीवनस्य | ............... | ............... | ............... | ............... |
| (3) भार्याम् | ............... | ............... | ............... | ............... |
| (4) दारग्रहणाय | ............... | ............... | ............... | ............... |
| (5) सम्मतौ | ............... | ............... | ............... | ............... |
| (6) अनेन | ............... | ............... | ............... | ............... |

**7. कोष्ठगतानि पदानि प्रयुज्य वाक्यानि रचयत ।**

(1) A merchant's son named Shaktikumara was living.
(श्रेष्ठिपुत्र शक्तिकुमार नि + वस्)

(2) At the well he saw a girl having few ornaments.
(कूप एका विरलभूषणा कुमारी दृश्)

(3) She took merchant's son to her house.
(श्रेष्ठिपुत्र स्वगृह आ + नी)

(4) Wealth is obtained through it.
(तत् धन मिल्)

(5) I bring vegetable, ghee and oil for money.
(धन शाक घृत तैल च आ + नी)

**8. आङ्ग्लभाषायाम् उत्तराणि लिखत ।**

(1) What does Shaktikumara think when he became twenty two years old ?

(2) What was Shaktikumara's planning to test an excellent girl ?

(3) Which things does the girl sell ? What does she get in return ?

(4) In what way did the girl increase Shaktikumara's liking for meal ?

(5) What attracted Shaktikumara to propose the girl for marriage ?

**9. आङ्ग्लभाषायां संक्षिप्तं टिप्पणं लिखत ।**

(1) Shaktikumara's planning for test

(2) Planning of the excellent girl

**10. आङ्ग्लभाषायाम् अनुवादं कुरुत ।**

(1) तत्कथं गुणवतीं भार्याम् अहं विन्देयमिति।

(2) एकदा स कावेरीतीरपत्तने समागतः।

(3) स्वर्णकाराय विक्रेतुं धात्रीमुक्तवती।

(4) उष्णीकृते जले च तान् प्रक्षिप्तवती।

(5) अतिथये प्रथमं स्नातुं निवेदितवती।

**Activity**

- Enlist virtues (good qualities) of an ideal citizen.
- Make a list of food-items prepared from any grain.

# 6. काष्ठखण्डः

In old-age educational system of India, vicinity of preceptor and disciple was of great importance. As it was the tradition that a student had to reside in Gurukula for his studies and so both of them had a chance to stay together for the whole day. Guru used to preach the pupil at any time and any place. As a result, (along with regular syllabus) a student used to get a chance to acquire knowledge sometimes naturally or sometimes suddenly. Today also this tradition has been preserved in Gurukulas and Pathashalas following age old methods of teaching and learning of Sanskrit. One of such incidents is presented in this lesson. Guru, while moving on the bank of a river with his disciple, suddenly watches a piece of wood floating on water in the river. At once Guru's sharp intellect (mind) becomes active to impart very significant knowledge to his disciple. The knowledge preached by Gura to his disciple (at that time and place) is very applicable even today.

Floating is an inherent property of wood. Fortunately it has reached to a river meeting the sea. So naturally this piece of wood is lucky enough to reach the sea, a treasure of jewels. But learned Guru can see even obstacles in this path obtained through luck by chance. Pointing out these obstacles, Guru informs his disciple that if the piece of wood keeps protecting itself from these obstacles, then and then only it can reach the sea, otherwise not.

Here, Guru has used beautiful metaphor by imaging a man as a piece of wood. and thus preached his disciple in a very simple way. Guru preaches that a man, who saves himself from four kinds of obstacles arising in his life, can only have the chance to reach the ocean of happiness.

---

गङ्गातीरे एकः गुरुः शिष्येण सह वर्तमानः आसीत्। स जलप्रवाहेण नीयमानं कञ्चन काष्ठखण्डं दर्शयन् शिष्यमाह – अयं जलप्रवाहेण सह समुद्रं प्राप्स्यति, परन्तु गमनमार्गे तीरे संलग्नता, भाराधिक्येन जले निमग्नता, आवर्तपातता, नदीजलवियोगश्चेति चत्वारो विघ्नाः न भवेयुः तदा एव।

गुरुरग्रे उपदिशति शिष्यम्। वयं सर्वे मानवाः अपि काष्ठखण्डा इव। अस्माकं जीवनमेव नदी। परिवारः प्रवाहरूपः। तत्र स्नेहरूपं जलं वहति। स्वकीये परिवारे जीवनं जीवन्तः काष्ठरूपा वयं सुखपूर्णं संसाररूपं समुद्रम् अवश्यं प्राप्तुं शक्नुमः, यदि चत्वारो विघ्ना न भवन्ति।



जीवने कीदृशाः विघ्नाः भवन्तीति शिष्यः अपृच्छत्।

गुरुः समुपादिशत् – नदीरूपे जीवने आहार-निद्रा-भयादयः तीरभूताः सन्ति। तीरेषु संलग्नता नाम आहार-निद्रा-भयादीनां सेवने सततं प्रवृत्तिः। वस्तुतस्तु आहारादयः सेवनीयाः भवन्ति, तथापि तत्र सततं संलग्नता विघ्न एव। आहार-निद्रा-भयादिषु सततं प्रवृत्तिरूपः विघ्नः भवति चेत् काष्ठखण्डरूपाः वयं सुखरूपं समुद्रं प्राप्तुं न शक्नुमः।

सामाजिको व्यवहारः भाररूपो भवति। यद्यपि सामाजिको व्यवहारः सर्वत्रैव अपेक्षितो भवति। परन्तु सः शक्तिमतिक्रम्य न भवेत्। ये जनाः स्वकीयां शक्तिमतिक्रम्य सामाजिकान् व्यवहारान् कुर्वन्ति ते अतिभारत्वात् निमज्जन्ति एव। निमज्जितः जनः सुखमयं संसारसमुद्रं प्राप्तुं न शक्नोति।

सुरापानम् अक्षक्रीडा तमाखुभक्षणं चौरकर्म इत्यादीनि दुर्व्यसनानि मानवजीवने आवर्तभूतानि सन्ति। एषु पतितो जनः बहिः

आगन्तुं न शक्नोति। अतः तत्र पतनमेव न भवेत् तादृशः प्रयत्नः सततं करणीयो भवति। ये जनाः व्यसनेषु पतिताः सन्ति ते तरन्तः अपि एकस्मिन् स्थाने परितः भ्रमन्ति। तेषां प्रगतिः बाधिता भवति। ततस्ते सुखादिरूपं संसारसमुद्रं प्राप्तुं नार्हन्ति।

परिवारात् विमुखत्वम् एव नदीजलवियोगः। सामान्यतया परिवारे निवसन्तः एव वयं संसारसमुद्रं प्राप्तुं समर्थाः भवामः। परन्तु यदि कश्चित् जनः स्वार्थवशात् क्रोधवशात् वा परिवारात् प्रतिमुखो भवति, सोऽपि नदी (परिवार)-जल-(स्नेह)-वियुक्तः कदाचिदपि ज्ञानेन सुखेन च पूर्णम् आनन्दमयं संसारसमुद्रं न प्राप्नोति।

चतुर्भ्यः विघ्नेभ्यः रक्षिताः जनाः ज्ञानेन सुखेन च पूर्णम् आनन्दमयं संसाररूपं समुद्रम् अवश्यं प्राप्नुवन्ति।

## Glossary

**Noun : (Masc.) काष्ठखण्डः** piece of wood **आवर्तः** whirlpool.

**(Fem.) : संलग्नता** sticking, joining **निमग्नता** sinking **प्रवृत्तिः** activity **अक्षक्रीडा** game of dice, gambling

**(Neu.) : स्नेहरूपम्** having form of affection **जीवनम्** life **सुरापानम्** drinking of wine/liquor **तमाखुभक्षणम्** eating of tobacco **विमुखत्वम्** turning away face from a thing.

**Pronoun : कञ्चन** some one **अस्माकम्** our **ये** (m.) who, what (here those) **ते** (m.) they **एषु** (m.) in the midst of them

**Adjective : नीयमानम् ( काष्ठखण्डम् )** to (a piece of wood) being taken away **स्वकीये ( परिवारे )** in one's (family) **चत्वारः ( विघ्नाः )** four (obstacles) **कीदृशाः ( विघ्नाः )** of what kind (obstacles) **सुखरूपम् ( समुद्रम् )** to ocean of joy **सामाजिकः ( व्यवहारः )** social (dealings) **भाररूपः ( व्यवहारः )** burdensome **पतितः ( जनः )** (man) who is fallen **तादृशः ( प्रयत्नः )** like that (effort) **आनन्दमयं ( संसारसमुद्रम् )** (to ocean in form of world) full of joy.

**Adverb : सह** with **अपि** also **इव** like **तत्र** there **नाम** named **वस्तुतः** in fact **तु** but **तथापि** still **चेत्** if **यद्यपि** although **सर्वत्र** everywhere **बहिः** out **परितः** on all sides **वा** or **सततम्** constant

**Compound :** काष्ठखण्डः (काष्ठस्य खण्डः - षष्ठी तत्पुरुष)। गङ्गातीरे (गङ्गायाः तीरम्, तस्मिन् - षष्ठी तत्पुरुष)। जलप्रवाहेण (जलस्य प्रवाहः, तेन - षष्ठी तत्पुरुष)। गमनमार्गे (गमनस्य मार्गः, तस्मिन् - षष्ठी तत्पुरुष)। भाराधिक्येन (भारस्य आधिक्यम्, तेन - षष्ठी तत्पुरुष)। आवर्तपातता (आवर्ते पातता - सप्तमी तत्पुरुष)। प्रवाहरूपः (प्रवाहः रूपं यस्य सः - बहुव्रीहि)। स्नेहरूपम् (स्नेहः रूपं यस्य सः - बहुव्रीहि)। काष्ठरूपाः (काष्ठं रूपं येषां ते - बहुव्रीहि)। सुखपूर्णम् (सुखेन पूर्णम् - तृतीया तत्पुरुष)। संसाररूपम् (संसारः रूपं यस्य सः, तम् - बहुव्रीहि)। नदीरूपे (नदी रूपं यस्य तत्, तस्मिन् - बहुव्रीहि)। आहारनिद्राभयादयः (आहारः च निद्रा च भयं च (- आहार-निद्रा-भयानि, इतरेतर द्वन्द्व), आहारनिद्राभयानि आदिः येषां ते - बहुव्रीहि)। प्रवृत्तिरूपः (प्रवृत्तिः रूपं यस्य सः - बहुव्रीहि)। सुखरूपम् (सुखं रूपं यस्य सः, तम् -बहुव्रीहि)। भाररूपः (भारः रूपम् यस्य सः - बहुव्रीहि)। संसारसमुद्रम् (संसारः एव समुद्रः, तम् - कर्मधारय)। अक्षक्रीडा (अक्षाणां क्रीडा - षष्ठी तत्पुरुष)। तमाखुभक्षणम् (तमाखोः भक्षणम् - षष्ठी तत्पुरुष)। चौरकर्म (चौरस्य कर्म - षष्ठी तत्पुरुष)। मानवजीवने (मानवस्य जीवनम्, तस्मिन् - षष्ठी तत्पुरुष)। आवर्तभूतानि (आवर्तः भूतः यस्य तत्, तानि - बहुव्रीहि)। सुखादिरूपम् (सुखम् आदिः यस्य सः - सुखादिः, (बहुव्रीहि), सुखादिः रूपं यस्य सः, तम् - बहुव्रीहि)। स्वार्थवशात् (स्वार्थस्य वशः, तस्मात् - षष्ठी तत्पुरुष)। क्रोधवशात् (क्रोधस्य वशः, तस्मात् - षष्ठी तत्पुरुष)। नदीजलवियोगः (नद्याः जलम् (- नदीजलम्, षष्ठी तत्पुरुष), नदीजलात् वियोगः - पञ्चमी तत्पुरुष)।

**Participle : ( वि.कृ. ) सेवनीयाः** should be served **करणीयाः** should be done **( क.भू.कृ ) उपविष्टः** is seated **अपेक्षितः** expected **निमज्जितः** plunged, sunk **पतितः** fallen **बाधिता** obstructed **रक्षिताः** protected **( हे.कृ ) प्राप्तुम्** for getting **आगन्तुम्** for coming

**Root : First Gana (Parasmaipada) वह् ( वहति )** to flow **प्रच्छ् > पृच्छ् ( पृच्छति )** to ask **अर्ह् ( अर्हति )** to be worthy of

**Sixth Gana उप + दिश् ( उपदिशति )** to preach, to teach

## Notes

**1. Meaning : प्रदर्शयन्** Showing **प्राप्स्यति** will attain/reach **भाराधिक्येन** due to great heaviness **आवर्तपातता** to be caught in whirlpool **चत्वारः** four (m.) **न भवेयुः** may not be **जीवनं जीवन्तः** living a life **सुखपूर्णम्** full of happiness **शक्नुमः** we can be **सेवने** in attending upon **शक्तिम् अतिक्रम्य** surpassing capacity **न भवेत्** may not happen **अतिभारत्वात्** due to excessive heaviness **निमज्जन्ति** (they) sink **इत्यादीनि** etcetera **आवर्तभूतानि** become whirlpool **तरन्तः** floating **निवसन्तः** living **समर्थाः भवामः** we become capable **स्वार्थवशात्** due to selfishness **क्रोधवशात्** because of anger **नदी ( परिवार )-जल ( स्नेह )-वियुक्तः** separated from river (family) water (affection) **प्राप्नोति** acquires

**2. Sandhi :** नदीजलवियोगश्चेति चत्वारो विघ्नाः (नदीजलवियोगः च इति चत्वारः विघ्नाः)। गुरुरग्रे (गुरुः अग्रे)। काष्ठखण्डा इव (काष्ठखण्डाः इव)। भवन्तीति (भवन्ति इति)। वस्तुतस्तु (वस्तुतः तु)। सामाजिको व्यवहारः (सामाजिकः व्यवहारः)। भाररूपो भवति (भाररूपः भवति)। सर्वत्रैव (सर्वत्र एव)। अपेक्षितो भवति (अपेक्षितः भवति)। करणीयो भवति (करणीयः भवति)। ततस्ते (ततः ते)। नार्हन्ति (न अर्हन्ति)। सोऽपि (सः अपि)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) जलप्रवाहे गुरुः शिष्यं किं दर्शयति ? ○

(क) पाषाणखण्डम् (ख) काष्ठखण्डम् (ग) काञ्चनम् (घ) गमनमार्गम्

(2) वयं सर्वे मानवाः कीदृशाः इव स्मः ? ○

(क) जलम् इव (ख) नदी इव (ग) विघ्ना इव (घ) काष्ठखण्डा इव

(3) सामाजिको व्यवहारः कुत्र अपेक्षितो भवति ? ○

(क) सुखे (ख) शुभप्रसङ्गे (ग) सर्वत्र (घ) अतिदुःखे

(4) केषां जनानां प्रगतिः बाधिता भवति ? ○

(क) भयग्रस्तानाम् (ख) व्यसनिजनानाम् (ग) व्यावहारिकानाम् (घ) शिष्यजनानाम्

(5) गुरुः ............... सह उपविष्टः आसीत्। ○

(क) शिष्ये (ख) शिष्येण (ग) शिष्यस्य (घ) शिष्यम्

(6) ............... प्रतिमुखत्वम् एव नदीजलवियोगः।

(क) परिवारात् (ख) संसारात् (ग) व्यवहारात् (घ) प्रवाहात्

(7) आहारादयः ............... भवन्ति।

(क) सेवनीयाः (ख) सेवनीयः (ग) सेवनीयो (घ) सेवनीयम्

(8) सामाजिको व्यवहारः शक्तिमनतिक्रम्य न ............... ।

(क) भवेताम् (ख) भवेयुः (ग) भवेत् (घ) भवेयम्

(9) गमनमार्गे ............... विघ्नाः भवन्ति।

(क) एकः (ख) सप्त (ग) त्रयः (घ) चत्वारः

## 2. एकवाक्येन संस्कृतभाषायाम् उत्तरत ।

(1) गुरुः कुत्र वर्तमानः आसीत् ?

(2) गुरुः कम् उपदिशति ?

(3) प्रवाहरूपे परिवारे किं वहति ?

(4) कीदृशाः जनाः एकस्मिन् स्थाने भ्रमन्ति ?

(5) विघ्नरहिताः जनाः कीदृशं समुद्रं प्राप्नुवन्ति ?

## 3. कृदन्तप्रकारं लिखत ।

(1) आगन्तुम् ............... (2) अतिक्रम्य ...............

(3) पतिताः ............... (4) करणीयाः ...............

(5) बाधिता ...............

## 4. सन्धिं योजयत ।

(1) शिष्यः + अपृच्छत्। ...............

(2) पतितः + जनः। ...............

(3) अतः + तत्र। ...............

(4) प्रगतिः + तेषाम्। ...............

(5) गुरुः + अग्रे। ...............

## 5. अधः प्रदत्तानां पदानां समासप्रकारं लिखत।

(1) भाराधिक्येन ............... (2) आहारनिद्राभयादयः ...............

(3) संसारसमुद्रम् ............... (4) सुखपूर्णम् ...............

**6. धातुरूपाणां परिचयं कारयत ।**

| | | | | | |
|---|---|---|---|---|---|
| यथा : गच्छन्ति | गम् ( गच्छ् ) | परस्मैपद | वर्तमानकाल | अन्यपुरुष | बहुवचन |
| (1) भ्रमन्ति | ............... | ............... | ............... | ............... | ............... |
| (2) अपृच्छत् | ............... | ............... | ............... | ............... | ............... |
| (3) भवेयुः | ............... | ............... | ............... | ............... | ............... |
| (4) भवामः | ............... | ............... | ............... | ............... | ............... |

**7. पुरुषवचनानुसारं शब्दरूपाणां परिचयं कारयत ।**

| | | | | |
|---|---|---|---|---|
| यथा : देशे | देश | सप्तमी | एकवचनम् | In the country |
| (1) प्रवाहेण | ............... | ............... | ............... | ............... |
| (2) अस्माकम् | ............... | ............... | ............... | ............... |
| (3) तीरेषु | ............... | ............... | ............... | ............... |
| (4) व्यवहारान् | ............... | ............... | ............... | ............... |
| (5) परिवारात् | ............... | ............... | ............... | ............... |

**8. प्रश्नानाम् उत्तराणि आङ्ग्लभाषया लिखत ।**

(1) Who does not deserve real happiness ?

(2) Why has author compared man with a piece of wood ?

(3) Which obstacles can be there for a piece of wood to reach the ocean ?

(4) Explain the obstacle आवर्तपात (falling in whirlpool).

**9. विभागद्वयं यथार्थरीत्या संयोजयत ।**

| क | ख |
|---|---|
| (1) आवर्तपातता | (1) परिवारात् प्रतिमुखत्वम् |
| (2) तीरे संलग्नता | (2) सामाजिकव्यवहाराणां भाराधिक्यम् |
| (3) जलवियोगः | (3) व्यसनेषु सततं पतनम् |
| (4) जले निमग्नता | (4) आहारादीनां सेवने सततं प्रवृत्तिः |
| | (5) तन्न युक्तं साम्प्रतं क्षणमपि अत्र अवस्थातुम्। |

**Activity**

- Prepare a list of vices related to man and write the harm caused by it.
- Enlist the names of famous persons who have become great leaving bad habits.

# 7. सुभाषितकुसुमानि

[सुष्ठु भाषितं सुभाषितम् । That which is said well is सुभाषित (epigram). Inexhaustible treasure of epigrams is found in Sanskrit. The literate believe that पृथिव्यां त्रीणि रत्नानि-जलम् अन्नं सुभाषितम् । There are three gems on the earth - water, food and wise sayings. As water and food are inevitable for mankind so is epigram also inevitable.

Sanskrit epigrams introduce not only Indian culture or people, but they also introduce human culture. Hence they guide every humanlife beyond the place and time. It is an undertaking (approach) to establish values in human life. Like a friend, these epigrams help in character building of a person. These epigrams also supply beautiful illustrations of the fact that how can a man experience happiness and joy by following (practising) things which are worthy to be grasped in life.It is a special feature of epigram to convey (contain) ocean of wisdom in a small vessel.

Seven epigrams are presented here which beautifully describe the value of good people's words, usefulness of trees, acquisition of virtues with efforts, loss caused by unstable minded person, means of examining man, worth following virtues of great persons and nature of resolute person are presented here. With a view to impart moral values, good qualities and life skills in students who are citizens of tomorrow, these Subhashitas are presented here.



सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथेनापि जले लिखितमक्षरम् ॥ 1 ॥

सेवितव्यो महावृक्षः फल-च्छाया-समन्वितः ।
यदि दैवात्फलं नास्ति च्छाया केन निवार्यते ॥ 2 ॥

आरोप्यते शिला शैले यत्नेन महता यथा ।
निपात्यते क्षणेनाधः तथात्मा गुणदोषयोः ॥ 3 ॥

क्षणे रुष्टः क्षणे तुष्टः रुष्टः तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः ॥ 4 ॥

यथा चतुर्भिः कनकं परीक्ष्यते
निघर्षण-च्छेदन-ताप-ताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते
श्रुतेन शीलेन गुणेन कर्मणा ॥ 5 ॥
आपत्सु रामः समरेषु भीमः
दानेषु कर्णश्च नयेषु कृष्णः ।
भीष्मः प्रतिज्ञापरिपालनेषु
विक्रान्तकार्येषु भवाञ्जनेयः ॥ 6 ॥

प्रारम्भते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहताः विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥ 7 ॥

## Glossary

**Noun (Masc.) : शपथः** oath **शैलः** mountain **प्रसादः** grace, favour **पुरुषः** person (In Sanskrit language word पुरुषः is used for every human being - i.e. for both 'man' and 'woman'). **समरः** battle **नयः** statesmanship, polity **आञ्जनेयः** Hanuman, son of Anjana

**(Fem.) : लीला** ease **छाया** shade **शिला** big stone

**(Neu.) : अक्षरम्** letter or alphabet 'अ' etc. **कनकम्** gold **श्रुतम्** knowledge **शीलम्** character

**Pronoun : केन (n. m.)** By whom

**Adjective : शिलालिखितम् ( अक्षरम् )** (letter) written on stone **फलच्छायासमन्वितः ( महावृक्षः )** (huge tree) full of fruits and shade

**Adverb : अधः** below, down **अद्यैव** just today

**Compound :** शिलालिखितम् (शिलायां लिखितम् - सप्तमी तत्पुरुष)। महावृक्षः (महान् चासौ वृक्षः - कर्मधारय)। फलच्छायासमन्वितः (फलम् च छाया च (-फलच्छाये, इतरेतर द्वन्द्व), फलच्छायाभ्याम् समन्वितः, तम् - तृतीया तत्पुरुष)। गुणदोषयोः (गुणः च दोषः च, तयोः - इतरेतर द्वन्द्व)। अव्यवस्थितचित्तस्य (व्यवस्थितं चित्तं यस्य सः -व्यवस्थितचित्तः - बहव्रीहि), न व्यवस्थितचित्तः, तस्य - नञ् तत्पुरुष)। निघर्षणच्छेदनतापताडनैः, (निघर्षणं च छेदः च तापः च ताडनं च निघर्षणच्छेदनतापताडनानि, तैः इतरेतर द्वन्द्व)। विक्रान्तकार्येषु (विक्रान्तं च तत् कार्यम्, तेषु - कर्मधारय)। नीतिनिपुणाः (नीतिषु निपुणाः - सप्तमी तत्पुरुष)। विघ्नभयेन (विघ्नात् भयम्, तेन - पञ्चमी तत्पुरुष)। विघ्नविहताः (विघ्नैः विहताः - तृतीया तत्पुरुष)। उत्तमजनाः (उत्तमः च असौ जनः, ते - कर्मधारय)।

**Participle : ( क.भू.कृ. ) प्रोक्तम्** told **लिखितम्** written **रुष्टः** one, who is angry/enraged **तुष्टः** pleased/satisfied **( वि.कृ. ) सेवितव्यः** should be served **( सं.भू.कृ. ) प्रारभ्य** having begun.

**Root : (First Gana) (Parasmaipada) वि + रम्( विरमति )** to pause, to stop **परि + त्यज्( परित्यजति )** to give up, to abandon.

## Notes

**1. Meaning :** **सद्भिः** by good men **असद्भिः** by wicked/bad men **आरोप्यते** is placed **यत्नेन महता** with great effort **क्षणेनाधः निपात्यते** within a moment it is made to fall down **तथात्मा गुणदोषयोः** similarly soul in matter of vices and virtues (one finds difficult to rise up to acuire virtue but easy to fall down to be acquainted with vices) **अव्यवस्थितचित्तस्य** having disturbed mind **चतुर्भिः** by four ways **परीक्ष्यते** is examined **निघर्षणच्छेदनतापताडनैः** by rubbing, cutting, heating and striking **कर्मणा** by action **आपत्सु** in difficulties **प्रतिज्ञापरिपालनेषु** in keeping promises **विक्रान्तकार्येषु** in vigorous deeds **भव** may you be **प्रारभ्यते न खलु विघ्नभयेन नीचैः** persons do not start being afraid of obstacles **मध्याः** middle ones **विघ्नैः प्रतिहन्यमानाः** facing troubles

**2. Sandhi :** सद्भिस्तु (सद्भिः तु)। शपथेनापि (शपथेन अपि)। सेवितव्यो महावृक्षः (सेवितव्यः महावृक्षः)। नास्ति च्छाया (न अस्ति छाया)। क्षणेनाधः (क्षणेन अधः)। तथात्मा (तथा आत्मा)। प्रसादोऽपि (प्रसादः अपि)। कर्णश्च (कर्णः च)। भवाञ्जनेयः (भव आञ्जनेयः)। पुनरपि (पुनः अपि)।

## Exercise

**1. विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत ।**

(1) सद्भिः लीलया प्रोक्तं कीदृशम् ? ◯

(क) अचलम् (ख) चलम् (ग) नश्वरम् (घ) असत्यम्

(2) महता यत्नेन शिला कुत्र आरोप्यते ? ◯

(क) भूमौ (ख) नदीतटे (ग) शैले (घ) गृहे

(3) अव्यवस्थितचित्तस्य प्रसादः कीदृशः ? ◯

(क) भयङ्करः (ख) दयनीयः (ग) अनुकरणीयः (घ) तुष्टिकरः

(4) पुरुषः केन परीक्ष्यते ? ◯

(क) शीलेन (ख) धनेन (ग) पदेन (घ) कनकेन

(5) ............... कर्णः भव। ◯

(क) नयेषु (ख) दानेषु (ग) समरेषु (घ) आपत्सु

(6) विक्रान्तकार्येषु ............... भव। ◯

(क) भीमः (ख) भीष्मः (ग) आञ्जनेयः (घ) कृष्णः

(7) कैः कार्यं न प्रारभ्यते ? ◯

(क) उत्तमजनैः (ख) नीचैः (ग) मध्यमैः (घ) जनैः

(8) के कार्यं प्रारभ्य न परित्यजन्ति ? ◯

(क) मध्यमजनाः (ख) नीचजनाः (ग) सामान्यजनाः (घ) उत्तमजनाः

**2. एकेन वाक्येन संस्कृतभाषायाम् उत्तरत ।**

(1) कैः प्रोक्तं जले लिखितमक्षरं भवति ?

(2) शिला कथं शैले आरोप्यते ?

(3) गुणेन कः परीक्ष्यते ?

(4) कार्यं प्रारभ्य के परित्यजन्ति ?

**3. उदाहरणानुसारं शब्दरूपाणां परिचयं कारयत ।**

| उदाहरणम् : जले | जल | अकारान्त | नपुंसकलिङ्ग | सप्तमी | एकवचन |
|---|---|---|---|---|---|
| (1) लीलया | ............... | ............... | ............... | ............... | ............... |
| (2) समरेषु | ............... | ............... | ............... | ............... | ............... |
| (3) गुणदोषयोः | ............... | ............... | ............... | ............... | ............... |
| (4) ताडनैः | ............... | ............... | ............... | ............... | ............... |

**4. आङ्ग्लभाषायाम् उत्तरत ।**

(1) How is gold tested ?

(2) Who should be the ideals in difficulty and keeping promises ? Why ?

(3) How is a man, not starting any activity, known as ?

**5. आङ्ग्लभाषायाम् अनुवादं कृत्वा अर्थं विस्तरत ।**

(1) यथा चतुर्भिः कनकं परीक्ष्यते
निघर्षण-च्छेदन-ताप-ताडनैः ॥

(2) सेवितव्यो महावृक्षः फल-च्छाया-समन्वितः ।
यदि दैवात्फलं नास्ति च्छाया केन निवार्यते ॥

**6. श्लोकस्य पूर्तिं कुरुत ।**

(1) आपत्सु रामः ......................... भवाञ्जनेयः ॥

**Activity**

- Collect other Sanskrit Subhashitas similar to these.
- Memorise and understand the meaning of other 2/4 Sanskrit Subhashitas.

# 8. साक्षिभूतः मनुष्यः

In this world, good and bad incidents happen at every place and every moment. Various objects existing on the earth in context with each other are becoming witnesses of these incidents. Non-living objects like stones etc and living beings like birds, animals, humanbeings have the chance to witness these happenings.

Because of one's peculiarity, these witnessing objects play different role. Non-living objects like stone, without doing any thing, become witness of any incident. Beasts like cow etc. run away from place of accident and try to save themselves. Nothing else can be expected from both of them except this type of behaviour. But man's situation is a little different from them, such as-a person witnessing accident feels sorrow for the afflicted person. He also becomes active to help the victim and thus performs his duty. He also tries to learn a lesson from it.

Now-a-days due to heavy traffic many road-accidents take place. In this situation many things are expected from the eye-witness but they are not fulfilled. So it is the duty of a witness person that he should be ready to perform his duty. The lesson presented here in dialogue form suggests the same.

---

(मार्गे घटमानायाः दुर्घटनायाः साक्षिणः के के भवन्ति, किं किं च ते आचरन्ति इति विषयमधिकृत्य पुनीतसुनीतौ परस्परं संवदतः।)

**पुनीतः** – भ्रातः ! मार्गे कदाचित् दुर्घटनाः अपि घटन्ति। तत्र प्रायः प्रस्तरादयो जडपदार्थाः, गवादयः पशवः मनुष्याश्चेति त्रयः साक्षिणः भवन्ति। किं त्वं जानासि यत् घटितायाः दुर्घटनायाः सन्दर्भे एते त्रयोऽपि भिन्नं भिन्नं कर्म समाचरन्ति।

**सुनीतः** – न जानामि। प्रथमं कथयतु यत् प्रस्तरादयः किं कुर्वन्ति ?

**पुनीतः** – प्रस्तरादयस्तु अचेतनाः सन्ति, ते स्वयं क्रियां कर्तुं समर्थाः न भवन्ति। अतः ते तथैव तिष्ठन्ति।

**सुनीतः** – सचेतनाः पशवः पक्षिणश्च किं कुर्वन्ति ?

**पुनीतः** – एते घटनया उत्थितात् ध्वनेः भयमनुभवन्ति। अतः घटनास्थलात् दूरे धावन्ति।

**सुनीतः** – सत्यं वदति भवान्। गवादयः पशवस्तु निर्बुद्धयः सन्ति। परन्तु कश्चित् सबुद्धिः मानवोऽपि यदि घटनास्थलात् दूरे धावति, तर्हि पशुरेव सः।

**पुनीतः** – वस्तुतस्तु मनुष्यः यदि मनुष्यः इव वर्तते, तदा सः दुर्घटनायाः साक्षी भूत्वा त्रिविधं कार्यम् आचरति।

**सुनीतः** – कानि कानि तानि त्रिविधानि कार्याणि ?

**पुनीतः** – प्रथमं कार्यम् अस्ति दुःखानुभूतिः। मनुष्य एव दुःखेन दुःखितो भवितुमर्हति, सुखेन च सुखितः। अतः दुर्घटनया पीडाग्रस्तं दुःखितं जनं दृष्ट्वा मनुष्येण दुःखानुभूतिः करणीया भवति। यः खलु एतादृशं जीवं पश्यन् अपि दुःखं न अनुभवति, सः मनुष्यः नास्ति, अपि तु सः प्रस्तरः एव। यतो हि प्रस्तरः कदापि अन्यस्य दुःखं न अनुभवति।

**सुनीतः** – यथार्थं भवानाह। मयापि बहुधा अपरिचितं दुर्घटनाग्रस्तं जनं पश्यता दुःखमनुभूतमस्ति। द्वितीयं कार्यं किमस्ति ?

**पुनीतः** – द्वितीयं कार्यं तु कर्तव्यस्य निर्वाहः। दुर्घटनाग्रस्तः जनः सद्यः एव ओषधालयश्रितः करणीयः भवति येन तस्य उचितः उपचारः स्यात्। तत्र सङ्गत्य कदाचित् तस्मै रक्तस्य आवश्यकता भवति चेत्, स्वकीयं रक्तमपि तस्मै दातव्यं भवति। तस्य परिवारे सूचना दातव्या भवति येन तस्य परिवारजनः ओषधालयमागत्य तस्य विशेषः सहायो भवेत्। दुर्घटनायाः साक्षिणः मनुष्यस्य एतादृशं कर्तव्यम्। सर्वैः मनुष्यैः अस्य कर्तव्यस्य निर्वाहः करणीयः एव।

**सुनीतः** – तृतीयं कार्यं किमस्ति, यत् घटनायाः साक्षी मनुष्यः आचरेत् ?

**पुनीतः** – तृतीयं कार्यम् अस्ति बोधप्राप्तिः। मनुष्येण सदैव बोधप्राप्तये प्रयत्नः करणीयो भवति। यदा वयं कस्याश्चित् दुर्घटनायाः साक्षिणः भवामः तदा कर्तव्यं समाचरन्तः दुःखमनुभवन्तः तस्याः दुर्घटनायाः कञ्चित् बोधमपि प्राप्तुम् अर्हामः। विना कारणं दुर्घटना न भवति। तत्र कस्यचित् जनस्य त्रुटिः कारणं भवति। सा त्रुटिः ज्ञातव्या। तदनन्तरं तादृशीं त्रुटिमहं न कदापि करिष्यामीति बोधोऽपि प्राप्तव्य एव।

**सुनीतः** – साधु कथितं भवता। घटनायाः साक्षिणः सन्तः कर्तव्यं निर्वहन्तोऽपि, दुःखमनुभवन्तोऽपि यदि वयं बोधपाठं न प्राप्नुमः तदा वयं मनुष्याः न स्मः।

## Glossary

**Noun (Masc.)** **प्रस्तरः** stone **ध्वनिः** noise **उपचारः** treatment **परिजनः** kinsman/relative **सहायः** helper

**(Fem.) :** **त्रुटिः** mistake, short coming **दुर्घटना** accident

**(Neu.) :** **भयम्** fear (Noun, भय is neuter in Sanskrit, whereas masculine in Gujarati.) **रक्तम्** blood **ओषधालयम्** hospital, dispensary

**Pronoun :** **एते** (m.) all these **तानि** (n.) those **कानि** (n.) who, which **येन** (m.) by whom **तस्य** (m.n.) his, its **अस्य** his **वयम्** we

**Adjectives :** **उत्थितात् ( ध्वनेः )** arisen (by noise) **त्रिविधम् ( कार्यम् )** of three kinds (work) **तानि त्रिविधानि ( कार्याणि )** those three (activities) **प्रथमम् ( कार्यम् )** first (action, step) **पीडाग्रस्तं दुःखितम् ( जनम् )** to (a person) afflicted and sad **द्वितीयम् ( कार्यम् )** second (work) **उचितः ( उपचारः )** proper (treatment) **स्वकीयम् ( रक्तम् )** one's own (blood) **तृतीयम् ( कार्यम् )** third (work) **तादृशीम् ( त्रुटिम् )** to such mistake/fault

**Adverb :** **प्रायः** generally **तथैव** as it is **तर्हि** then **खलु** indeed, really **अपि तु** but **यतो हि** because **यथार्थम्** as it is **बहुधा** often **सद्यः** immediately **सदैव** always **कदापि** at some time

**Compound :** प्रस्तरादयः (प्रस्तरः आदिः येषां ते – बहुव्रीहि)। (Here आदि means type/kind - so objects like stones are called प्रस्तरादि.) जडपदार्थाः (जडः चासौ पदार्थः च, ते – कर्मधारय)। घटनास्थलात् (घटनायाः स्थलम्, तस्मात् – षष्ठी तत्पुरुष)। दुःखानुभूतिः (दुःखस्य अनुभूतिः – षष्ठी तत्पुरुष)। पीडाग्रस्तम् (पीडया ग्रस्तः, तम् – तृतीया तत्पुरुष)। दुर्घटनाग्रस्तम् (दुर्घटनया ग्रस्तः, तम् – तृतीया तत्पुरुष)। ओषधालयश्रितः (ओषधस्य आलयः (– ओषधालयः, षष्ठी तत्पुरुष), ओषधालयं श्रितः – द्वितीया तत्पुरुष)। बोधप्राप्तिः (बोधस्य प्राप्तिः – षष्ठी तत्पुरुष)।

**Participle :** **( सं.भू.कृ. ) भूत्वा** becoming **संगत्य** going **( वि.कृ. ) दातव्यम्** should be given **ज्ञातव्या** should be known **प्राप्तव्यः** should be acquired **( क.भू.कृ ) कथितम्** is said

**Root : (First Gana) (Parasmaipada)** **घट् ( घटति )** to happen, to occur **धाव् ( धावति )** to run.

## Notes

**1. Meaning : भ्रातः !** O brother ! (Vocative case) **त्रयः साक्षिणः** three witnesses **प्रथमं कथयतु यत्** first of all say **कर्तुम् समर्थाः** are able to do **तथैव तिष्ठन्ति** remain stable (stay as they are) **निर्बुद्धयः भवन्ति** are dull **कश्चित् सबुद्धिः** some intelligent **परस्य दुःखेन दुःखितः** unhappy/sad on seeing other's pain/sorrow **भवितुमर्हति** is able to be **सुखेन च सुखिनः** happy in other's joy/pleasure **करणीया भवति** is to be done **जीवं पश्यन् अपि** even if seeing a person **पश्यता मया** watched by me **दुःखमनुभूतमस्ति** I have experienced pain **ओषधालयश्रितः** approached to hospital **कर्तव्यम् समाचरन्तः** following duty **दुःखम् अनुभवन्तः** experiencing pain **प्राप्तुम् अर्हामः** we can get **साधु कथितम्** well said **साक्षिणः सन्तः** being witness **कर्तव्यं निर्वहन्तः** performing duty **न प्राप्नुमः** we cannot get

**2. Sandhi :** प्रस्तरादयो जडपदार्थाः (प्रस्तरादयः जडपदार्थाः)। मनुष्याश्चेति (मनुष्याः च इति)। त्रयोऽपि (त्रयः अपि)। प्रस्तरादयस्तु (प्रस्तरादयः तु)। पक्षिणश्च (पक्षिणः च)। पशवस्तु (पशवः तु)। मानवोऽपि (मानवः अपि)। पशुरेव (पशुः एव)। मनुष्य एव (मनुष्यः एव)। दुःखितो भवितुमर्हति (दुःखितः भवितुम् अर्हति)। करणीयो भवति (करणीयः भवति)। बोधोऽपि (बोधः अपि)। प्राप्तव्य एव (प्राप्तव्यः एव)। निर्वहन्तोऽपि (निर्वहन्तः अपि)। दुःखमनुभवन्तोऽपि (दुःखम् अनुभवन्तः अपि)।

## Exercise

**1. विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) के स्वयं क्रियां कर्तुं समर्थाः न सन्ति ? ◯

(क) पशवः (ख) मनुष्याः (ग) प्रस्तराः (घ) पक्षिणः

(2) गवादयः पशवः कीदृशाः भवन्ति ? ◯

(क) अचेतनाः (ख) सबुद्धयः (ग) असमर्थाः (घ) निर्बुद्धयः

(3) दुर्घटनाग्रस्तः जनः कुत्र नेतव्यः ? ◯

(क) गृहम् (ख) ओषधालयम् (ग) कुत्रापि न (घ) पुलिसस्थानकम्

(4) घटनाया उत्थितेन ............... भयमनुभवन्ति। ◯

(क) दुःखेन (ख) ध्वनेः (ग) सुखेन (घ) ध्वनिना

(5) साक्षिभूतेन मनुष्येण सदैव किमर्थं प्रयत्नः करणीयः ? ◯

(क) बोधप्राप्तये (ख) धनप्राप्तये (ग) सुखप्राप्तये (घ) शान्तिप्राप्तये

(6) कः परस्य दुःखेन दुःखितः भवितुमर्हति ? ◯

(क) पशुः (ख) वृक्षः (ग) मनुष्यः (घ) प्रस्तरः

(7) साक्षिभूतस्य मनुष्यस्य द्वितीयं कार्यं किम् अस्ति ? ◯

(क) बोधप्राप्तिः (ख) दुःखानुभूतिः (ग) भयानुभूतिः (घ) कर्तव्यस्य निर्वाहः

## 2. एकवाक्येन संस्कृतभाषयाम् उत्तरत ।

(1) दुर्घटनायाः साक्षिणः के भवन्ति ?

(2) घटनया उत्थितात् ध्वनेः भीताः पशवः किं कुर्वन्ति ?

(3) दुर्घटनायाः कारणं किं भवति ?

(4) कर्तव्यस्य निर्वाहः कस्य कार्यमस्ति ?

## 3. अधः प्रदत्तानां कृदन्तानां प्रकारं लिखत ।

| | | | |
|---|---|---|---|
| (1) भूत्वा | ............... | (2) संगत्य | ............... |
| (3) करणीयः | ............... | (4) दातव्यम् | ............... |
| (5) भवितुम् | ............... | (6) प्राप्तव्यः | ............... |

## 4. सन्धिविच्छेदं कुरुत ।

(1) मनुष्याश्चेति ...............

(2) प्रस्तरादयस्तु ...............

(3) मानवोऽपि ...............

(4) निर्वहन्तोऽपि ...............

(5) पशुरेव ...............

(4) यतो हि ...............

## 5. रेखाङ्कितपदानां समासप्रकारं लिखत ।

(1) <u>जडपदार्थाः</u> साक्षिणः भवन्ति।

(2) अतः <u>घटनास्थलात्</u> दूरे धावन्ति।

(3) <u>दुर्घटनाग्रस्तं</u> दुःखितं जीवं पश्यन् जनः किं कुर्यात्।

## 6. रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत।

(का, कस्याः, कस्मात्, कम्, कैः)

(1) पशवः <u>ध्वनेः</u> भयमनुभवन्ति।

(2) <u>मनुष्यैः</u> कर्तव्यस्य निर्वाहः करणीयः।

(3) विना कारणं <u>दुर्घटना</u> न भवति।

(4) दुर्घटनायाः <u>बोधं</u> प्राप्तुम् अर्हामः।

## 7. प्रदत्तपदानि प्रयुज्य वाक्यानि रचयत ।

(1) An accident does not occur without reason.

(कारण विना दुर्घटना न भू)

(2) Ours are three duties.

(अस्मद् त्रि कर्तव्य अस्)

(3) Stones are inanimate.

(प्रस्तर अचेतन भू)

(4) Man experiences happiness and sorrow.

(मानव सुख च दुःख अनु + भू)

**8. निम्नलिखितानां प्रश्नानाम् उत्तराणि आङ्ग्लभाषया लिखत ।**

(1) Who happens to be the witness of an accident ?

(2) Which man is considered to be an animal ?

(3) What are the three duties of a man, who has witnessed the accident ?

(4) Which man is compared with a stone ? why ?

**Activity**

- Enlist emergency services to be done when accident occurs.
- Write a report on an accident you have seen.
- Prepare a chart of traffic rules.

# 9. चक्षुष्मान् अन्ध एव

In Sanskrit literary world Banabhatta is well reputed as best prose-writer. He lived in the first half of 7th century, during the rule of king Harshavardhana in Northern India. He was born in 'Vatsa' race. His father's name was Chitrabhanu and mother's name was Rajadevi. He has written two prose works named हर्षचरितम् and कादम्बरी. The theme of कादम्बरी is imaginative whereas that of हर्षचरितम् is historical. In Harshacharita, some occasions of his contemporary king Harshavardhana's life are narrated. In all there are eight sections in it, which are named as Uchchhvasa (उच्छ्वास). The persent excerpt is an editted version from the first उच्छ्वास of हर्षचरितम्.

In the assembly of पितामह (grandfather) Brahma, Durvasa, while chanting the hymns of Samaveda, quarrelled with another Rishi for some reason and made mistake in chanting of Mantras. This made Saraswati laugh. On seeing Saraswati laughing, Durvasa was enraged. Losing his temparament in anger, he cursed Saraswati to take birth on the earth. Frightened of Durvasa's anger, other Rishis kept quiet (remained silent), but Brahma scolded Durvasa in harsh words, which is narrated in present lesson.

Anger makes a man unable to discriminate good and bad. Hence, inspite of having eyes, he behaves like a blind. The reactions and results of anger are pointed out here. Here are described the things which a person, blind with anger, cannot see inspite of having eyes. Thus, the moral to stay away from anger is beautifully given here.

---

अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा पितामहो मङ्गलपटहेनेव स्वरेण आशाः पूरयन् सुधीरं दुर्वाससम् उवाच।



ब्रह्मन्, न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः। निहन्त्येष परस्तात्। इन्द्रियाश्वसमुत्थापितं हि रजः कलुषयति दृष्टिम् अनक्षजिताम्। कियद् दूरं वा चक्षुरीक्षते। विशुद्धया हि धिया पश्यन्ति कृतबुद्धयः सर्वान् अर्थान् असतः सतो वा। निसर्गविरोधिनी चेयं पयःपावकयोरिव धर्मक्रोधयोरेकत्र वृत्तिः। आलोकमपहाय कथं तमसि निमज्जसि। क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिः न ते आत्मदोषं पश्यति। क्व महातपोभारवैवधिकता, क्व पुरोभागित्वम्।

अतिरोषणः चक्षुष्मान् अन्ध एव जनः।

न हि कोपकलुषिता विमृशति मतिः कर्तव्यमकर्तव्यं वा। कुपितस्य प्रथमम् अन्धकारीभवति विद्या, ततो भृकुटिः। आदौ इन्द्रियाणि रागः समास्कन्दति, चरमं चक्षुः। आरम्भे तपो गलति, पश्चात् स्वेदसलिलम्। पूर्वम् अयशः स्फुरति, अनन्तरम् अधरः।

कथं लोकविनाशाय ते विषपादपस्येव जटावल्कलानि जातानि। अनुचिता खलु अस्य मुनिवेषस्य हारयष्टिरिव वृत्तमुक्ता चित्तवृत्तिः। शैलूष इव वृथा वहसि कृत्रिमम् उपशमशून्येन चेतसा तापसाकल्पम्। अल्पमपि न ते पश्यामि कुशलजातम्।

– हर्षचरिते प्रथम-उच्छ्वासे

## Glossary

**Noun (Masc.) : पितामहः** Brahma (According to mythology, Brahma is the creator of human world. Hence he is called father of father.). **पटहः** drum **दुर्वासाः** name of a sage (well-known for his anger) **अर्थः** object **आलोकः** light **रागः** attachment and redness **निसर्गः** nature **विषपादपः** tree of poison **शैलूषः** actor **आकल्पः** dress, attire.

**(Fem.) : आशा** direction **वृत्ति** condition, behaviour **भृकुटि** eyebrow **हारयष्टि** necklace **वैवधिकता** ability to carry load

**Adjective : शप्ताम् ( सरस्वतीम् )** to one (Saraswati) who is cursed **इन्द्रियाश्वसमुत्थापितम् ( रजः )** (dust) arose by horses in the form of senses **कियद् ( दूरम् )** how (far) **विशुद्धया ( धिया )** by pure (intellect) **परदोषदर्शनदक्षा ( दृष्टिः )** expert in finding fault with others (vision) **कोपकलुषिता ( मतिः )** polluted by anger (intellect) **अतिरोषणः ( जनः )** very angry, enrged **चक्षुष्मान् ( जनः )** having eyes (man) **वृत्तमुक्ता ( चित्तवृत्तिः )** mannerless (tendency) **उपशमशून्येन ( चेतसा )** by disturbed/devoid of pacification (mind)

**Adverb : परस्तात्** afterwards **एकत्र** togethere **क्व** where **अनन्तरम्** afterwards **पश्चात्** then

**Compound :** मङ्गलपटहेन (मङ्गलः चासौ पटहः, तेन – कर्मधारय)। साधुसेवितः (साधुभिः सेवितः – तृतीया तत्पुरुष)। इन्द्रियाश्वसमुत्थापितम् – इन्द्रियाणि एव अश्वाः ( – इन्द्रियाश्वाः, कर्मधारय), इन्द्रियाश्वैः समुत्थापितम् – तृतीया तत्पुरुष)। कृतबुद्धयः (कृता बुद्धिः येन, ते – बहुव्रीहि)। निसर्गविरोधिनी (निसर्गस्य विरोधिनी – षष्ठी तत्पुरुष)। पयःपावकयोः (पयः च पावकश्च, तयोः – इतरेतर द्वन्द्व)। धर्मक्रोधयोः (धर्मः च क्रोधः च, तयोः – इतरेतर द्वन्द्व)। सर्वतपसाम् (सर्वम् च तत् तपः, तेषाम् – कर्मधारय)। परदोषदर्शनदक्षा (परस्य दोषः – परदोषः, षष्ठी तत्पुरुष), परदोषस्य दर्शनम् ( – परदोषदर्शनम्, षष्ठी तत्पुरुष), परदोषदर्शने दक्षा – सप्तमी तत्पुरुष)। आत्मदोषम् (आत्मनः दोषः, तम् – षष्ठी तत्पुरुष)। महातपोभारवैवधिकता (महत् च तत् तपः (कर्मधारय), महातपसः भारः महातपोभारः (षष्ठी तत्पुरुष), महातपोभारस्य वैवधिकता – षष्ठी तत्पुरुष)। कोपकलुषिता (कोपेन कलुषिता – तृतीया तत्पुरुष)। स्वेदसलिलम् (स्वेदस्य सलिलम् – षष्ठी तत्पुरुष)। लोकविनाशाय (लोकानां विनाशः, तस्मै – षष्ठी तत्पुरुष)। विषपादपस्य (विषस्य पादपः, तस्य – षष्ठी तत्पुरुष)। जटावल्कलानि (जटा च वल्कलानि च – इतरेतर द्वन्द्व)। मुनिवेषस्य (मुनेः वेषः, तस्य – षष्ठी तत्पुरुष)। हारयष्टिः (हारः एव यष्टिः – कर्मधारय)। वृत्तमुक्ता (वृत्तेन मुक्ता – तृतीया तत्पुरुष)। चित्तवृत्तिः (चित्तस्य वृत्तिः – षष्ठी तत्पुरुष)। उपशमशून्येन (उपशमेन शून्यम्, तेन – तृतीया तत्पुरुष)। तापसाकल्पम् (तापसस्य आकल्पः, तम् – षष्ठी तत्पुरुष)।

**Participle : ( सं.भू.कृ. ) दृष्ट्वा** seeing **अपहाय** leaving **( क.भू.कृ. ) प्रवृत्तः** engaged.

## Notes

**1. Meaning : चक्षुष्मान् अन्ध एव** blind in spite of having eyes **पूरयन्** filling **सुधीरम्** seriously **उवाच** spoke, said **ब्रह्मन्** O Brahmin ! (an address used for Durvasa) **साधुसेवितः** practised by good men **पन्थाः** path **निहन्ति** kills **कलुषयति** pollutes **अनक्षजिताम्** of those having sensitive senses, eyes **धिया** by intellect **कृतबुद्धयः** wise persons **असतः सतः वा अर्थान्** to real or false objects **पयःपावकयोः इव** like water and fire **तमसि** in darkness **निमज्जसि** you are sinking **महातपोभारवैवधिकता** ability to bear the power of severe penance **पुरोभागित्वम्** tendency to find fault of others **अन्धकारीभवति** becomes blind, gets destroyed **समास्कन्दति** encompasses, affects **चरमम्** last **तापसाकल्पम्** costume/dress of a sage **( आकल्प = वेष ) कुशलजातम्** to many skills.

**2. Sandhi :** पितामहो मङ्गलपटहेनेव (पितामहः मङ्गलपटहेन इव)। साधुसेवितोऽयम् (साधुसेवितः अयम्)। येनासि (येन असि)। निहन्त्येष परस्तात् (निहन्ति एषः परस्तात्)। चक्षुरीक्षते (चक्षुः ईक्षते)। सतो वा (सतः वा)। चेयम् (च इयम्))। पयःपावकयोरिव (पयःपावकयोः इव)। धर्मक्रोधयोरेकत्र (धर्मक्रोधयोः एकत्र)। आलोकमपहाय (आलोकम् अपहाय)। दृष्टिरिव (दृष्टिः इव)। ततो भृकुटिः (ततः भृकुटिः)। तपो गलति (तपः गलति)। विषपादपस्येव (विषपादपस्य इव)। हारयष्टिरिव (हारयष्टिः इव)। शैलूष इव (शैलूषः इव)।

## Exercise

### 1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।

(1) इन्द्रियाश्वसमुत्थापितं रजः किं कलुषयति ? ◯

(क) मनः (ख) मस्तकम् (ग) दृष्टिम् (घ) सत्यम्

(2) कुपिता बुद्धिः किं न पश्यति ? ◯

(क) मार्गम् (ख) परदोषम् (ग) आलोकम् (घ) आत्मदोषम्

(3) कुपितस्य स्वेदसलिलात् पूर्वं किं गलति ? ◯

(क) तपः (ख) कर्तव्यम् (ग) रागः (घ) अधरः

(4) कुपितस्य पूर्वम् अयशः ............... , अनन्तरम् अधरः। ◯

(क) विमृशति (ख) स्फुरति (ग) कलुषयति (घ) निमज्जति

(5) 'शैलूष' शब्दस्य कः अर्थः ? ◯

(क) dancer (ख) actor (ग) singer (घ) mountain

(6) वृत्तमुक्ता चित्तवृत्तिः कीदृशी इव ? ◯

(क) हारयष्टिः (ख) विषवल्ली (ग) दुष्टबुद्धिः (घ) अविद्या

### 2. एकवाक्येन संस्कृतभाषायाम् उत्तरत ।

(1) कृतबुद्धयः कथं पश्यन्ति ?

(2) धर्मक्रोधयोः एकत्र वृत्तिः कीदृशी ?

(3) कोपकलुषिता मतिः किं न विमृशति ?

(4) मुनिवेषस्य का अनुचिता ?

(5) क्रोधान्धस्य किम् अन्धकारीभवति ?

(6) दुर्वासाः कीदृशेन चेतसा तापसाकल्पं वहति ?

**3. समासप्रकारं लिखत ।**

(1) मङ्गलपटहेन ................ (2) साधुसेवितः ................

(3) कृतबुद्धयः ................ (4) कोपकलुषिता ................

(5) धर्मक्रोधयोः ................ (6) विषपादपस्य ................

**4. सन्धिविच्छेदं कुरुत ।**

(1) साधुसेवितोऽयम् ................

(2) चक्षुरीक्षते ................

(3) ततो भ्रूकुटिः ................

(4) अन्ध एव ................

**5. रेखाङ्कितानां पदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।**

(कदा, कस्य, कीदृशी, कथम्, कः)

(1) <u>पितामहः</u> सुधीरम् उवाच।

(2) <u>आरम्भे</u> तपो गलति।

(3) <u>कुपितस्य</u> मतिः कर्तव्यमकर्तव्यं न विमृशति।

(4) <u>कुपिता</u> बुद्धिः आत्मदोषं न पश्यति।

**6. आङ्ग्लभाषायाम् उत्तरत ।**

(1) Whom did Durvasa curse ? Why ?

(2) What is region and anger together compares to ?

(3) Why did Brahma compare Durvasa with an actor ?

(4) With does author compare Durvasa's costume and matted hair with ? Why ?

(5) What does Brahma say regarding forbearance ?

**7. संक्षिप्तं टिप्पणं लिखत ।**

(1) Physical effects of wrath

(2) Brahma's rebuke to Durvasa

**8. यथायोग्यं संयुज्य पूर्णं वाक्यं रचयत ।**

| क | ख |
|---|---|
| (1) आरम्भे तपो गलति | (1) अनन्तरम् अधरः। |
| (2) आदौ इन्द्रियाणि रागः समास्कन्दति | (2) पश्चात्स्वेदसलिलम्। |
| (3) प्रथमम् अन्धकारीभवति विद्या | (3) विमृशति मतिः |
| (4) पूर्वम् अयशः स्फुरति | (4) चरमं चक्षुः। |
| | (5) ततो भ्रूकुटिः। |

**Activity**

- Collect various maxims or proverbs advising to remain aloof from anger.
- Collect other stories related to Durvasa.

# 10. त्वमेका भवानि

Stotrakavya is an exclusive tradition of Sanskrit literature. Shlokas used for praising are called Stotras. Sometimes such Stotras are in form of one Muktaka or sometimes they are in numbers of verses like five, six, eight etc. Stotras composed by Adishankaracharya have become very famous. The exact figure of stotras written by him has not been found yet. Many stotras are well-known in his name. Verses presented here are selected from one of his famous stotras having eight stanzas.

Goddess Bhavani is praised here. Every verse of Stotra focuses on unparalled surrender of devotee and faith of an innocent child. It shows that the devotee, reciting this stotra, is not at all interested in worldly relalions like mother-father, brother-sister, son-daughter, husband-wife and so on. For him, Goddess Bhavani is the only resort. Moreover he is also not interested in ceremonial rites like scripture, austerity, pilgrimage, vows, fasting etc. He likes only to seek refuge to his worth-worshipping Goddess Bhavani. He has full faith that in any situation, Goddess Bhavani only is his guardian.

This Stotra can be sung beautifully. We have to learn a lesson that it is better to live a life full of faith, virtues and simplicity than to perform ceremonial rites. Goddess Bhavani always protects a person, who lives such a life.

---

न तातो न माता न बन्धुर्न दाता  
न पुत्रो न पुत्री न भृत्यो न भर्ता।  
न जाया न विद्या न वृत्तिर्ममैव  
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ 1 ॥

न जानामि दानं न च ध्यानयोगं  
न जानामि तन्त्रं न च स्तोत्रमन्त्रम्।  
न जानामि पूजां न च न्यासयोगं  
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ 2 ॥

न जानामि पुण्यं न जानामि तीर्थं  
न जानामि मुक्तिं लयं वा कदाचित्।  
न जानामि भक्तिं व्रतं वापि मातः  
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ 3 ॥

विवादे विषादे प्रमादे प्रवासे  
जले चानले पर्वते शत्रुमध्ये।  
अरण्ये शरण्ये सदा मां प्रपाहि  
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ 4 ॥

अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणदीनः सदा जाड्यवक्त्रः।
विपत्तौ प्रविष्टः प्रणष्टः सदाऽहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ 5 ॥

## Glossary

**Noun (Masc.) : तातः** father, elder **बन्धुः** brother, relative **भृत्यः** servant **विषादः** dejection **प्रमादः** laziness **अनलः** fire **लयः** absorption

**(Fem.) : जाया** wife **वृत्तिः** livelihood **भवानी** name of Parvati (wife of Shiva) **मुक्तिः** salvation (to be free from cycle of birth and death) **भक्तिः** devotion (According to पुराण there are nine ways of भक्ति.) **विपत्तिः** difficulty, calamity

**(Neu.) : व्रतम्** vow (used also in masculine in Sanskrit. व्रत is a determination taken voluntarily to do or not to do certain things with religious emotions and to do certain good deeds regularly.) **अरण्यम्** forest **शरण्यम्** shelter, refuge.

**Adjective : अनाथः** orphan **दरिद्रः** poor **जरारोगयुक्तः** affected by old age and disease **महाक्षीणदीनः** very weak and poor **जाड्यवक्त्रः** having sluggish face **( अहम् ) विपत्तौ प्रविष्टः ( अहम् )** plunged in difficulty **प्रणष्टः ( अहम् )** destroyed.

**Adverb : कदाचित्** sometime **वापि** and moreover

**Compound :** ध्यानयोगम् ( ध्यानस्य योगः, तम् – षष्ठी तत्पुरुष ) । स्तोत्रमन्त्रम् ( स्तोत्रं च मन्त्रः च – स्तोत्रमन्त्रम् – समाहार द्वन्द्व ) । न्यासयोगम् (न्यासस्य योगः, तम् – षष्ठी तत्पुरुष) । शत्रुमध्ये (शत्रूणां मध्यः, तस्मिन् – षष्ठी तत्पुरुष ) । अनाथः ( न विद्यते नाथः यस्य सः – बहुव्रीहि ) । जरारोगयुक्तः (जरा च रोगः च (जरारोगौ – इतरेतर द्वन्द्व), जरारोगाभ्यां युक्तः – तृतीया तत्पुरुष ) । महाक्षीणदीनः ( क्षीणः च दीनः च ( क्षीणदीनौ – इतरेतर द्वन्द्व), महान्तौ च तौ क्षीणदीनौ – कर्मधारय ) । जाड्यवक्त्रः ( जाड्यं वक्त्रं यस्य सः – बहुव्रीहि ) ।

## Notes

**1. Meaning : न जानामि** I do not know **ध्यानयोगम्** to profound meditation (ध्यानयोग is way of thinking process about god or supreme reality.) **तन्त्रम्** Tantra (method of worshipping to acquire extreme strength). **स्तोत्रमन्त्रम्** Stotra and Mantra (hymn) **न्यासयोगम्** Nyasayoga (Nyasa-yoga is a method of meditation with recitation of Mantras of various gods in different limbs of body.) **मातः** O Mother ! **मां प्रपाहि** protect me.

**2. Sandhi :** तातो न ( तातः न ) । बन्धुर्न ( बन्धुः न ) । पुत्रो न ( पुत्रः न ) । भृत्यो न ( भृत्यः न ) । वृत्तिर्ममैव ( वृत्तिः मम एव ) । ममैव ( मम एव ) । गतिस्त्वम् ( गतिः त्वम् ) । चानले ( च अनले ) । अनाथो दरिद्रो जरारोगयुक्तो महाक्षीणदीनः ( अनाथः दरिद्रः जरारोगयुक्तः महाक्षीणदीनः ) । सदाऽहम् ( सदा अहम् ) ।

## Exercise

**1. विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) वृत्तिः शब्दस्य कः अर्थः ? ○

(क) जीवनचर्या (ख) वर्तनम् (ग) प्रवृत्तिः (घ) निर्वृतिः

(2) कुत्र प्रविष्टस्य भक्तस्य भवानी एका एव गतिः वर्तते ? ○

(क) व्रते (ख) वने (ग) विपत्तौ (घ) सर्वत्र

(3) भवानि इति ............... पदम् अस्ति। ○

(क) क्रियापदम् (ख) संबोधनपदम् (ग) कर्तृकारकम् (घ) कर्मकारकम्

(4) न जानामि ............... लयं वा कदाचित्। ○

(क) पूजाम् (ख) व्रतम् (ग) मुक्तिम् (घ) प्रलयम्

(5) गतिस्त्वं ............... भवानि। ○

(क) प्रपाहि (ख) वयम् (ग) त्वमेका (घ) भवान्

**2. उदाहरणानुसारं परिचयं कारयत ।**

| | पद | शब्द | लिङ्ग | विभक्ति-वचन |
|---|---|---|---|---|
| उदाहरणम् : | विपत्तौ | विपत्ति | इकारान्त स्त्रीलिङ्ग | सप्तमी एकवचन |
| (1) | पूजाम् | ............... | ............... | ............... |
| (2) | वृत्तिः | ............... | ............... | ............... |
| (3) | जले | ............... | ............... | ............... |
| (4) | त्वम् | ............... | ............... | ............... |
| (5) | व्रतम् | ............... | ............... | ............... |

**3. रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।**

(कुत्र, किम्, कः, का)

(1) अहं <u>ध्यानयोगं</u> न जानामि।

(2) मम <u>वृत्तिः</u> नास्ति।

(3) <u>अरण्ये</u> सदा मां प्रपाहि।

**4. समासप्रकारं लिखत ।**

(1) अनाथः ............... (2) शत्रुमध्ये ...............

(3) जाड्यवक्त्रः ............... (4) ध्यानयोगम् ...............

**5. आङ्ग्लभाषायाम् उत्तरं लिखत ।**

(1) Which relatives are abandoned by a devotee to consider goddess as his only resort ?

(2) Which things does a devotee not know ?

(3) In which different situations does a devotee pray goddess to protect him ?

(4) Which adjectives does a devotee use for himself in the stanza अनाथो दरिद्रो.... ?

**6. श्लोकपूर्तिं कुरुत ।**

(1) विवादे विषादे ......................... त्वमेका भवानि ॥

(2) अनाथो दरिद्रो ......................... त्वमेका भवानि ॥

**Activity**

- Get and read another Stotra composed by Shankaracharya.
- Sing in chorus this Stotra in the classroom.

•

# 11. यस्य जननं तस्य मरणम्

It is our age old tradition to preach moral through stories. On the basis of information of Sanskrit literature available today, it can be said that this tradition has started with Jatakamala of Aryashra. It contains stories of Lord Buddha's previous births. The theme of these stories is where and what auspicious things Buddha performed in his previous birth. There after many stories were written in Sanskrit and still it is going on.

It is the peculiarity of Sanskrit stories that the name given to character signifies the work or quality of that character. In present story there are two characters - Vittadasa (servant of wealth) and Kutanatha (master of frauds). Vittadasa is presented as greedy and Kutanatha as a person,cheating any one by his fraud.

There is one maxim in Sanskrit लोभः पापस्य कारणम्. Greed is the basic root of all sins. The present story explains how the greed causes harm by making one helpless to do unfair things. In the lesson many adjectives and substantives (nouns) are used, which will be helpful to know the use of विशेषण and विशेष्य।

---

अस्ति वित्तदासो नाम प्रभूतलोभः समृद्धः कश्चित् वणिग्जनः। तस्य कूटनाथाभिधः वैश्यः प्रातिवेशिकः आसीत्।

एकदा कूटनाथेन चिन्तितं यदयं वित्तदासः धनिकोऽपि लुब्धो वर्तते। अतः केनापि उपायेन मया असौ वञ्चनीयः। एवं विचार्य सः कूटनाथः एकदा वित्तदासस्य गृहमुपगम्य अकथयत्, ''भोः श्रेष्ठिन्, अस्माकं बहवः कुटुम्बिजनाः श्वः अतिथयः भविष्यन्ति। तेषामर्थे भोजनादिनिर्माणाय कानिचित् पात्राणि कृपया मह्यं यच्छतु। परश्वः तानि प्रत्यर्पयिष्यामि।''

प्रातिवेशिकधर्मभावेन वित्तदासः कूटनाथाय पात्राणि प्रायच्छत्।

पात्रोपयोगावसाने कूटनाथः पात्राणि प्रत्यर्पयितुं वित्तदासस्य गृहमगच्छत्। तैः पात्रैः सह कूटनाथः अन्यानि कानिचित् लघूनि नूतनानि पात्राणि अपि तत्र स्थापितवान्। लघूनां नूतनानां पात्राणां दर्शनेन विस्मितः वित्तदासः कूटनाथमपृच्छत्, ''भो वयस्य ! एतानि पात्राणि मम न सन्ति।'' कूटनाथः अकथयत् ''मित्र ! यानि पात्राणि भवता



दत्तानि तानि मम गृहे रात्रौ प्रसूतानि। एतानि लघूनि नूतनानि पात्राणि भवतः पात्राणामपत्यानि सन्ति।''

अपत्यरूपेण नूतनानि पात्राणि सम्प्राप्य वित्तदासः प्रसन्नः जातः।

व्यतीतेषु कतिपयेषु दिवसेषु कूटनाथः पुनरपि वित्तदासं पात्रार्थं प्रार्थयत। प्रदत्तेभ्यः पात्रेभ्यः अपि अधिकानां पात्राणां लाभो भविष्यति इति दुर्मत्या प्रेरितो वित्तदासः तस्मै सर्वाणि इष्टानि पात्राणि दत्तवान्।

व्यतीतेऽपि एकमासे यदा कूटनाथः पात्राणि न प्रत्यर्पितवान् तदा चिन्तामापन्नः वित्तदासः कूटनाथगृहं गत्वा स्वकीयानि पात्राणि अयाचत। कूटनाथः सशोकम् अकथयत्, ''भवतः सर्वाणि पात्राणि मृतानि''।

वित्तदासः कोपाविष्टः सन् अकथयत् ''एवं कथं भवेत्। भो वञ्चक ! त्वं मिथ्या वदसि। निर्जीवानां पात्राणां मरणं कथं सम्भवति ?''

कूटनाथः धैर्यमवलम्ब्य शान्तवचसा अवदत्, ''महोदय ! यदि पात्राणां जन्म भवति, तर्हि तेषां मरणमपि भवति। पूर्वं जातानि पात्राणि भवतः गृहे विलसन्ति। यानि पात्राणि भवद्भिः दत्तानि तानि मम गृहे मृतानि। तत्र अहं किं कर्तुं समर्थः। पश्य,

जन्म भवति पात्राणां मरणे संशयः कथम् ।
जगति यत्समुत्पन्नं नश्यति सर्वथा ध्रुवम् ॥''



## Glossary

**Noun : (Masc.)** **प्रातिवेशिकः** neighbour **वैश्यः** Bania **धनिकः** rich man **अतिथिः** guest (one, whose date of arrival is not fixed) **वञ्चकः** rogue, cheat

**(Fem.)** **मिथ्या** false **दुर्मतिः** evil mind (bad intellect)

**Pronoun :** **मह्यम्** for me तैः (m. n.) by them **अन्यानि** (n.) others **एतानि** (n.) these **भवता** by you **सर्वाणि** (n) all **यानि** (n.) which (plural)

**Adjectives :** **कूटनाथाभिधः यथार्थाभिधानः वैश्यः (प्रातिवेशकः)** a bania Kutanatha having appropriate name (neighbour) **कानिचित् (पात्राणि)** to some (utensils) **तैः (पात्रैः)** with those/them (utensils) **अन्यानि कानिचित् लघूनि नूतनानि (पात्राणि)** some other small new (utensils) **लघूनां नूतनानाम् (पात्राणाम्)**

of small new (utensils) **स्वकीयानि ( पात्राणि )** one's own (utensils) **अधिकानाम् ( पात्राणाम् )** of more (utensils) **सर्वाणि इष्टानि ( पात्राणि )** to all desired/needed (utensils) **निर्जीवानाम् ( पात्राणाम् )** of lifeless/ non-living (utensils) **जातानि ( पात्राणि )** born/produced (utensils).

**Adverb : परश्वः** day after tomorrow **पुनरपि** again **कथम्** how, why **हि** indeed **सर्वथा** in all respects **ध्रुवम्** certainly.

**Compound :** प्रभूतलोभः (प्रभूतः लोभः यस्य सः – बहुव्रीहि)। वणिग्जनः (वणिक् च असौ जनः – कर्मधारय)। कूटनाथाभिधः (कूटस्य नाथः (–कूटनाथः, षष्ठी तत्पुरुष), कूटनाथः अभिधा यस्य सः – बहुव्रीहि)। यथार्थाभिधानः (यथार्थम् अभिधानं यस्य सः – बहुव्रीहि)। कुटुम्बिजनाः (कुटुम्बी च असौ जनः, ते – कर्मधारय)। अतिथिः (न विद्यते तिथिः यस्य सः – बहुव्रीहि)। भोजनादिनिर्माणाय (भोजनादीनां निर्माणाय – षष्ठी तत्पुरुष))। प्रातिवेशिकधर्मभावेन (प्रातिवेशिकस्य धर्मः (–प्रातिवेशिकधर्मः, षष्ठी तत्पुरुष), प्रातिवेशिकधर्मस्य भावः, तेन – षष्ठी तत्पुरुष)। वित्तदासः (वित्तस्य दासः – षष्ठी तत्पुरुष)। कूटनाथः (कूटस्य नाथः – षष्ठी तत्पुरुष)। पात्रोपयोगावसाने (पात्राणाम् उपयोगः (–पात्रोपयोगः, षष्ठी तत्पुरुष), पात्रोपयोगस्य अवसानम्, तस्मिन् – षष्ठी तत्पुरुष)। अपत्यरूपेण (अपत्यं रूपं यस्य सः, तेन – बहुव्रीहि)। एकमासे (एकः च असौ मासः, तस्मिन् – कर्मधारय)। कूटनाथगृहम् (कूटनाथस्य गृहम् – षष्ठी तत्पुरुष)। सशोकम् (शोकेन सहितं यथा स्यात् तथा – अव्ययीभाव)। कोपाविष्टः (कोपेन आविष्टः – तृतीया तत्पुरुष)। शान्तवचसा (शान्तम् च तद् वचः, तेन – कर्मधारय)।

**Participle : ( सं.भू.कृ. ) विचार्य** thinking **उपगम्य** approaching **( क.भू.कृ. ) चिन्तितम्** thought **प्रेरितः** inspired **विस्मितः** astonished **प्रसूतानि** born **जातः** became **( कर्तरि भू.कृ. ) दत्तवान्** gave **प्रत्यर्पितवान्** returned **( वि.कृ. ) वञ्चनीयः** should be cheated/deceived **( हे.कृ. ) प्रत्यर्पयितुम्** for returning

**Root : (First Gana) :** (Parasmaipada) **दा > यच्छ्** **( यच्छति )** to give **सम् + भू** **( संभवति )** can be **वि + लस्** **( विलसति )** to glitter, to shine.

**(Atmanepada) याच्** **( याचते )** to beg, to ask for

**(Tenth Gana)** (Atmanepada) **प्र + अर्थ्** **( प्रार्थयते )** to pray, to request.

## Notes

**1. Meaning : प्रभूतलोभः** very greedy **भोजनादिनिर्माणाय** to cook/prepare food etc. **प्रत्यर्पयिष्यामि** I will return **प्रातिवेशिकधर्मभावेन** with a sensibility of neighbour's duty **पात्रोपयोगावसाने** at the end of the use of utensils **तत्र स्थापितवान्** placed there **रात्रौ प्रसूतानि** were born at night **अपत्यरूपेण** as a child **व्यतीतेषु कतिपयेषु ( दिवसेषु )** when some days passed **व्यतीते अपि एकमासे** even after one month passed **न प्रत्यर्पितवान्** did not return **चिन्तामापन्नः** became worried **सशोकम्** with dejection **कोपाविष्टः सन्** being enraged **एवं कथं भवेत्** how can this happen ? **भवतः गृहे विलसन्ति** are glittering in your house **जगति** in the world **यत्समुत्पन्नम्** that which is produced/born **नश्यति ध्रुवम्** certainly gets perished.

**2. Sandhi :** वित्तदासो नाम (वित्तदासः नाम)। धनिकोऽपि (धनिकः अपि)। लुब्धो वर्तते (लुब्धः वर्तते)। पुनरपि (पुनः अपि)। लाभो भविष्यति (लाभः भविष्यति)। व्यतीतेऽपि (व्यतीते अपि)। प्रेरितो वित्तदासः (प्रेरितः वित्तदासः)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) वित्तदासः धनिकोऽपि कीदृशः आसीत् ? ◯

(क) सन्तुष्टः (ख) उदारः (ग) लुब्धः (घ) असन्तुष्टः

(2) कूटनाथस्य गृहे के अतिथयः भविष्यन्ति ? ◯

(क) कुटुम्बिजनाः (ख) प्रातिवेशिकाः (ग) साधवः (घ) ग्रामजनाः

(3) वित्तदासः कूटनाथाय केन भावेन पात्राणि प्रायच्छत् ? ◯

(क) मात्रधर्मभावेन (ख) दयाभावेन (ग) मित्रधर्मभावेन (घ) प्रातिवेशिकधर्मभावेन

(4) कूटनाथः कदा पात्राणि प्रत्यर्पयितुं वित्तदासस्य गृहम् अगच्छत् ? ◯

(क) भोजनावसाने (ख) पात्रोपयोगावसाने (ग) कार्यावसाने (घ) आगामिनि दिवसे

(5) किं सम्प्राप्य वित्तदासः विस्मितः अभवत् ? ◯

(क) पुरातनानि पात्राणि (ख) अर्वाचीनानि पात्राणि

(ग) नूतनानि पात्राणि (घ) गुरूणि पात्राणि

(6) भवतः सर्वाणि पात्राणि मृतानि। – एतत् वाक्यं कः वदति ? ◯

(क) कूटनाथः (ख) वित्तदासः (ग) कूटमतिः (घ) वित्तनाथः

**2. अधोलिखितानां प्रश्नानां प्रकोष्ठगतशब्दस्य योग्यरूपेण उत्तरं लिखत ।**

(1) अस्ति वित्तदासो नाम प्रभूतलोभः ............... वणिग्जनः। (समृद्ध)

(2) कानिचित् लघूनि ............... पात्राण्यपि तत्र स्थापितानि। (नूतन)

(3) ............... कतिपयेषु दिवसेषु कूटनाथः पुनरपि वित्तदासं पात्रेभ्यः प्रार्थयते। (व्यतीत)

(4) तस्मै ............... ............... पात्राणि दत्तवान्। (सर्व, इष्ट)

(5) कूटनाथः ............... अकथयत्। (सशोक)

**3. एकवाक्येन संस्कृतभाषया उत्तरत ।**

(1) कूटनाथः किमर्थं पात्राणि अयाचत ?

(2) किं सम्प्राप्य वित्तदासः प्रसन्नः सञ्जातः ?

(3) कूटनाथगृहं गत्वा वित्तदासः किम् अयाचत ?

(4) निर्जीवानां पात्राणां किं न सम्भवति ?

(5) किं सर्वथा नश्यति ?

**4. अधोलिखितानां पदानां कृदन्तप्रकारं लिखत ।**

(1) लुब्धः ............... (2) प्रत्यर्पयितुम् ...............

(3) दत्तानि ............... (4) वञ्चनीयः ...............

(5) सम्प्राप्य ............... (6) आपन्नः ...............

**5. सन्धिं प्रयोजयत ।**

(1) वित्तदासः नाम ...............
(2) कः चित् ...............
(3) धनिकः अपि ...............
(4) श्वः अतिथयः ...............
(5) वित्तदासः तस्मै ...............

**6. रेखाङ्कितानां पदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।**

(कदा, कुत्र, कैः, कस्य, केषाम्, कः)

(1) पात्रैः सह अन्यानि पात्राणि स्थापितानि।
(2) पात्राणि रात्रौ प्रसूतानि।
(3) कूटनाथः पात्रेभ्यः प्रार्थयत।
(4) पात्राणि भवतः गृहे विलसन्ति।
(5) पात्राणां जन्म भवति।

**7. सूचनानुसारं शब्दरूपं लिखत।**

| | शब्द | लिङ्ग | विभक्ति | वचन |
|---|---|---|---|---|
| उदाहरणम् – नूतनानि | नूतन | नपुंसकलिङ्गम् | प्रथमा-द्वितीया | बहुवचन |
| (1) पात्राणाम् | ............... | ............... | ............... | ............... |
| (2) उपायेन | ............... | ............... | ............... | ............... |
| (3) रात्रौ | ............... | ............... | ............... | ............... |
| (4) दिवसेषु | ............... | ............... | ............... | ............... |
| (5) मया | ............... | ............... | ............... | ............... |

**8. कियापदं वर्तमानकाले परिवर्त्य वाक्यं पुनः लिखत ।**

(1) कूटनाथः वित्तदासम् अकथयत्।
(2) कुटुम्बिजनाः अतिथयः भविष्यन्ति।
(3) वित्तदासः कूटनाथाय पात्राणि प्रायच्छत्।

**9. आङ्ग्लभाषायाम् उत्तरत ।**

(1) What was the planning of Kutanatha to deceive Vittadasa ?
(2) Why did Vittadasa give Kutanatha utensils second time ?

**Activity**

- Collect other similar stories describing loss caused by greed.
- Collect proverbs found in other languages related to greed.

# 12. कलिकालसर्वज्ञो हेमचन्द्राचार्यः

कलिकालसर्वज्ञ हेमचन्द्राचार्य is well-reputed in cultural history of Gujarat. On full-moonday of the month of Kartik in विक्रम संवत 1145, he was born in Dhandhuka in Amdavad District. His name was Changadeva. At the age of eight he was consecrated by Devachandrasuriji Maharaj at Khambhat. He was known by name Somachandra. At the age of twenty-one, he acquired the position of Suri, (he was designated as Suri) and was known by name Hemachandrasuri. He studied different faculties of learning and expertised all the lores available in his time. He bestowed various faculties of learning with his own compositions (works). Because of his vast knowledge, he was entitled as कलिकालसर्वज्ञ.

Having conquered king Bhoja of Malwa, Siddharaja Jaysimha, with abundant wealth and prosperous storage of books (library) returned to Anahilapura Patan. A group of learneds went there to welcome him under the leadership of Hemachandrasoori.

It is said कीर्तिः यस्य सः जीवति. He, who has acquired fame remains alive, though dead. Such imperishable fame is obtained not by wealth (Laxmi) but by learning (Sarasvati). Siddharaj Jaysimha, who had realized this fact requested Hemachandracharya to compose literary work related to different subjects. He earnestly requested him to write a wonderful volume of Sanskrit Grammar. This volume is known as सिद्धहैमशब्दानुशासन. The lesson presented here is prepared keeping in mind this event of cultural history of Gujarat. The fact that one wishing to preserve his fame should worship literature is focussed here.



विक्रमस्य द्वादश्यां शताब्द्यां सिद्धराजः जयसिंहः मालवविजयं कृतवान्। विजयानन्तरं जयसिंहः नृपतेः यशोवर्मणः सर्वं धनं गृहीत्वा अणहिलपुरं प्रत्यागतवान्। धनेन सह तत्रत्यः ग्रन्थागारोऽपि तस्य हस्तगतो जातः। अस्मिन् ग्रन्थागारे बहवोऽनुपमाः ग्रन्थाः आसन्। तेषु भोजेन विरचितं सरस्वतीकण्ठाभरणनाम्ना प्रसिद्धं भोजव्याकरणमपि एकतमम् आसीत्।

एकदा सिद्धराजः विचारपथम् आरूढः। सः अचिन्तयत्, 'मालवविजयेन अहं धनस्य स्वामित्वं प्राप्तवान्। तस्य ग्रन्थागारः अपि मया प्राप्तः। परन्तु भोजव्याकरणेन भोजस्य यादृशी कीर्तिर्वर्तते तादृशी कीर्तिर्मया न प्राप्ता। अतः एतादृशं किमपि करणीयं येन मदीया कीर्तिरपि तादृशी भवेत् यादृशी भोजस्यास्ति।'

एवं विचार्य सः जैनमुनिमाचार्यं हेमचन्द्रं प्राप्तवान्, निवेदितवान् च, "अयि आचार्यवर्याः! भवन्तो भोजव्याकरणसदृशं एकं व्याकरणं विरचयन्तु, येन भवतां मम च अमरा कीर्तिर्भवेत्" इति।

सिद्धराजस्य जयसिंहस्य निवेदनेन प्रेरिताः हेमचन्द्राचार्याः एकमपूर्वं व्याकरणग्रन्थं रचितवन्तः। सः सिद्धहैमव्याकरणम् इति नाम्ना प्रसिद्धः अस्ति। अस्मिन् अष्टौ अध्यायाः सन्ति। तेषु प्रारम्भिकेषु षट्सु अध्यायेषु संस्कृतभाषायाः अन्तिमयोः द्वयोः अध्याययोः प्राकृतभाषाणाञ्च व्याकरणमप्यस्ति।

हेमचन्द्राचार्यैः लक्षश्लोकपरिमितं साहित्यं विरचितमस्ति। अस्मिन् साहित्ये 'अभिधानचिन्तामणिः' इति नामकः कोषग्रन्थः, 'चालुक्यवंशोत्कीर्तनम्' इति नामकं संस्कृत-प्राकृतभाषानिबद्धं द्व्याश्रयं महाकाव्यम्, 'काव्यानुशासनम्' इति नामकः अलंकारशास्त्रीयः ग्रन्थः, 'छन्दोऽनुशासन'ञ्चेत्यादीनां बहूनां ग्रन्थानां समावेशो भवति।

गुर्जरप्रदेशे लब्धजनिरयं हेमचन्द्राचार्यः न केवलं गुर्जरप्रान्तेऽपि तु समग्रेऽपि संस्कृतसाहित्याकाशे सूर्यवत् प्रकाशते।

## Glossary

**Noun : (Mas.) विक्रमः** King Vikramaditya (who lived about 2070 years ago) **ग्रन्थागारः** library **सिद्धराजः** King Siddharaja Jaysimha of Anahilvad. **कोषग्रन्थः** dictionary.

**(Fem.) शताब्दी** century **कीर्तिः** fame, reputation **प्राकृतभाषा** languages like Magadhi etc. spoken by some characters of Sanskrit play, language of Jain Agama granthas.

**(Neu) : अणहिलपुरम्** old name of Patan (uttar Gujarat).

**Pronoun : अस्मिन्** (m.n.) in this **तेषु** (m.n.) in them **येन** (m.n.) by whom **भवताम्** (m.pl.) yours.

**Adjective : द्वादश्याम् ( शताब्द्याम् )** in twelfth century **बहवः अनुपमाः ( ग्रन्थाः )** many extraordinary (volumes) **मदीया ( कीर्तिः )** my imperishable (fame) **अमरा ( कीर्तिः )** immortable (fame) **एकः अपूर्वः ( व्याकरणग्रन्थः )** one extraordinary (volume of Grammar) **अष्टौ ( अध्यायाः )** eight (Adhyayas) **प्रारम्भिकेषु षट्सु ( अध्यायेषु )** in the first six (Adhyayas) **अन्तिमयोः द्वयोः ( अध्याययोः )** in last two (Adhyayas) **लक्षश्लोकपरिमितम् ( साहित्यम् )** size of having one lac Shlokas (literature) **अभिधानचिन्तामणिः नामकः ( कोषग्रन्थः )** (dictionary) named Abhidhanachintamani **काव्यानुशासनम् नामकः अलंकारशास्त्रीयः ( ग्रन्थः )** (book) named Kavyanushasanam a volume on rhetorics **बहूनाम् ( ग्रन्थानाम् )** of many (books)

**Adverb : एकदा** once **एवम्** in this way **सूर्यवत्** like the Sun, as Sun यादृशी, as तादृशी such

**Participle : ( सं. भू. कृ. ) आनीय** bringing **विचार्य** thinking **( कर्तरि भू. कृ. ) कृतवान्** did **प्रत्यागतवान्** returned **प्राप्तवान्** acquired **गतवान्** went **निवेदितवान्** requested **रचितवन्तः** composed (pl.) **( क.भू. कृ. ) जातः** born **विरचितम्** composed **प्राप्तः** acquired **प्राप्ता** received **( वि. कृ. ) करणीयम्** should be done.

**Compound :** मालवविजयम् (मालवानां विजयः, तम् - षष्ठी तत्पुरुष)। ग्रन्थागारः (ग्रन्थानाम् आगारः - षष्ठी तत्पुरुष)। हस्तगतः (हस्तं गतः - द्वितीया तत्पुरुष)। अनुपमाः (न विद्यते उपमा यस्य सः अनुपमः, ते-बहुव्रीहि)। विचारपथम् (विचारस्य पन्थाः, तम् - षष्ठी तत्पुरुष)। व्याकरणग्रन्थम् (व्याकरणस्य ग्रन्थः, तम् - षष्ठी तत्पुरुष)। लब्धजनिः (लब्धा जनिः येन सः - बहुव्रीहि)। संस्कृतसाहित्याकाशे (संस्कृतसाहित्यस्य आकाशः, तस्मिन् - षष्ठी तत्पुरुष)।

**Root : (first Gana) (Atmanepada) वृत् ( वर्तते )** to be **प्र + काश् ( प्रकाशते )** to shine/glitter

**Tenth Gana : (Parasmaipada) वि + रच् ( विरचयति )** to make, to compose

## Notes

**1. Meaning : विजयानन्तरम्** after conquering **तत्रत्यः** of that place **हस्तगतो जातः** obtained **सरस्वतीकण्ठाभरणनाम्ना प्रसिद्धम्** well-known by name Sarasvatikanthabharana **भोजव्याकरणमपि** also grammar written by king Bhoja **विचारपथम् आरूढः** started thinking **धनस्य स्वामित्वम्** the ownership of riches

**एवम् विचार्य** thinking so **अयि आचार्यवर्या:** O honourable preceptor **प्रेरिता:** inspired **एकम् अपूर्वम्** one extraordinary **सिद्धहैमव्याकरणम् इति नाम्ना** named Siddhahaimavyakaranam **चालुक्यवंशोत्कीर्तनम् नामकं द्व्याश्रयं महाकाव्यम्** epic named Chalukyavamshotkirtanam (written using grammatical examples on one hand and enhancing the plot of story on other hand) composed with the help of both **गुर्जरप्रदेशे** in region of Gujarat **लब्धजनि:** got born **संस्कृतसाहित्याकाशे** in the firmament in the form of Sanskrit literature **सूर्यवत् प्रकाशते** glitters/shines like the Sun.

**2. Sandhi :** ग्रन्थागारोऽपि (ग्रन्थागार: अपि)। हस्तगतो जात: (हस्तगत: जात:)। बहवोऽनुपमा: (बहव: अनुपमा:)। कीर्तिर्वर्तते (कीर्ति: वर्तते)। कीर्तिर्मया (कीर्ति: मया)। कीर्तिरपि (कीर्ति: अपि)। भोजस्यास्ति (भोजस्य अस्ति)। भवन्तो भोजव्याकरणस्य (भवन्त: भोजव्याकरणस्य)। कीर्तिर्भवेत् (कीर्ति: भवेत्)। प्राकृतभाषाणाञ्च (प्राकृतभाषाणां च)। छन्दोऽनुशासनञ्चेत्यादीनाम् (छन्द: - अनुशासनं च इत्यादीनाम्)। समावेशो भवति (समावेश: भवति)। लब्धजनिरयम् (लब्धजनि: अयम्)। गुर्जरप्रान्तेऽपि (गुर्जरप्रान्ते अपि)। समग्रेऽपि (समग्रे अपि)।

## Exercise

**1. अधोलिखितेभ्य: विकल्पेभ्य: समुचितम् उत्तरं चिनुत ।**

(1) सिद्धराज: जयसिंह: मालवविजयं कदा कृतवान्। ◯

(क) द्वादश्यां शताब्द्याम् (ख) विंशतितमायां शताब्द्याम्

(ग) एकविंशतितमायां शताब्द्याम् (घ) एकादश्यां शताब्द्याम्

(2) सरस्वतीकण्ठाभरणनाम्ना प्रसिद्धं व्याकरणं केन विरचितम् अस्ति ? ◯

(क) जयसिंहेन (ख) हेमचन्द्रेण (ग) भोजेन (घ) यशोवर्मणा

(3) भोजस्य कीर्ति: केन आसीत् ? ◯

(क) भोजव्याकरणेन (ख) दयाभावेन (ग) न्यायेन (घ) भोजसाहित्येन

(4) हेमचन्द्राचार्येण रचितं व्याकरणं केन नाम्ना प्रसिद्धमस्ति ? ◯

(क) प्राकृतव्याकरणम् (ख) जैनव्याकरणम्

(ग) सिद्धहैमव्याकरणम् (घ) सिद्धव्याकरणम्

(5) सिद्धहैमव्याकरणे कति अध्याया: सन्ति ? ◯

(क) षड् (ख) दश (ग) अष्टौ (घ) सप्त

(6) हेमचन्द्राचार्येण रचितं साहित्यं ............... वर्तते। ◯

(क) दशसहस्रश्लोकपरिमितम् (ख) लक्षश्लोकपरिमितम्

(ग) सहस्रश्लोकपरिमितम् (घ) दशलक्षश्लोकपरिमितम्

(7) हेमचन्द्राचार्येण विरचितस्य कोषग्रन्थस्य नाम किमस्ति ? ◯

(क) भट्टिकाव्यम् (ख) अभिधानचिन्तामणि:

(ग) काव्यालंकार: (घ) अमरकोष:

## 2. एकवाक्येन संस्कृतभाषया उत्तरत ।

(1) जयसिंहः कं नृपतिं पराजितवान् ?

(2) भोजेन विरचितं व्याकरणं केन नाम्ना प्रसिद्धमस्ति ?

(3) कस्य निवेदनेन प्रेरिताः हेमचन्द्राचार्याः व्याकरणग्रन्थं रचितवन्तः ?

(4) सिद्धहैमव्याकरणस्य षट्सु अध्यायेषु कस्य व्याकरणं वर्तते ?

(5) हेमचन्द्राचार्येण रचितस्य अलंकारशास्त्रीयस्य ग्रन्थस्य नाम किमस्ति ?

## 3. सन्धिविच्छेदं कुरुत ।

(1) ग्रन्थागारोऽपि ...............

(2) कीर्तिर्वर्तते ...............

(3) व्याकरणमप्यस्ति ...............

(4) प्राकृतभाषाणाञ्च ...............

(5) लब्धजनिरयम् ...............

## 4. रेखाङ्कितपदानां स्थाने कर्तरि भूतकृदन्तस्य योग्यं रूपं लिखत ।

(1) विजयानन्तरं जयसिंहः अणहिलपुरं <u>प्रत्यागच्छत्</u>।

(2) एकदा सिद्धराजः <u>अचिन्तयत्</u>।

(3) सः हेमचन्द्रस्य समीपम् <u>अगच्छत्</u>।

(4) हेमचन्द्राचार्याः व्याकरणग्रन्थम् <u>अरचयन्</u>।

(5) सः लक्षश्लोकपरिमितं साहित्यं <u>अरचयत्</u>।

## 5. सूचनानुसारं शब्दरूपाणां परिचयं कारयत ।

| | शब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| उदाहरणम् – विक्रमस्य | विक्रम | पुंल्लिंग | षष्ठी | एकवचन |
| (1) शताब्द्याम् | ............... | ............... | ............... | ............... |
| (2) नृपतेः | ............... | ............... | ............... | ............... |
| (3) धनेन | ............... | ............... | ............... | ............... |
| (4) ग्रन्थागारे | ............... | ............... | ............... | ............... |
| (5) ग्रन्थानाम् | ............... | ............... | ............... | ............... |
| (6) आचार्यवर्याः | ............... | ............... | ............... | ............... |

## 6. कोष्ठगतपदानि प्रयुज्य वाक्यानि रचयत ।

(1) Abhidhanachintamani is a dictionary.

(अभिधानचिन्तामणि एक कोषग्रन्थ अस्)

(2) Hemachandracharya has composed one epic poem.

(हेमचन्द्राचार्य एक महाकाव्य रच्)

(3) Jayasimha came back to Anahilapur.

(जयसिंह अणहिलपुर प्रति + आ + गम् (कर्तरि भू.कृ. (क्तवतु))

(4) There are eight Adhyayas in Siddhahaimanushasana.

(सिद्धहैमशब्दानुशासन अष्टन् अध्याय अस्)

(5) Once Jayasimha thought.

(जयसिंह एकदा विचार कृ (कर्तरिभू.कृ. (क्त))

## 7. आङ्ग्लभाषया उत्तरत ।

(1) When did Siddharaja Jayasimha get victory over Malwa ?

(2) What did Jayasimha achieve by getting victory over Malwa ?

(3) On account of what did Bhoja earn fame ?

(4) What is the proportion of literature composed by Hemachandracharya ?

## 8. क विभागं ख विभागेन सह संयोजयत ।

| क | ख |
|---|---|
| (1) काव्यानुशासनम् | (1) अन्तिमयोः अध्याययोः |
| (2) प्राकृतभाषायाः व्याकरणम् | (2) कोषग्रन्थः |
| (3) अभिधानचिन्तामणिः | (3) जयसिंहः |
| (4) मालवविजयः | (4) अलंकारशास्त्रीयः ग्रन्थः |
| (5) सरस्वतीकण्ठाभरणम् | (5) भोजराजः |
| | (6) शिक्षाशास्त्रम् |

**Activity**

- Get and read the biography of Acharya Hemachandra.
- Make a list of literary works composed by Hemachandracharya.

# 13. गीतामृतम्

Shrimad Bhagavadgeeta is a portion occuring in Bhishmaparva of the Mahabharata. There are 18 अध्याय, and 700 verses in it. Great battle was fought between Kauravas and Pandavas on the battle field of Kurukshetra. On seeing his kinsmen and friends, standing in opposite party, Arjuna becomes emotional and feels dejected. He gives up the idea of fighting being afraid of consequences of war.

At this juncture, Lord Krishna, acting as the charioteer of Arjuna, advises him what he should do and what not. The preaching of Shrikrishna is well-known as Bhagavad-Gita in the whole universe. The advice preached to Arjuna is still relevant. The Bhagavadgita adorns the highest position in the world's philosophy.

If everyone would be busy performing his duty without thinking of consequences, the world would be full of happiness. This is the main principle of the Geeta. Eight shlokas selected from the Geeta are presented here which successively narrate immortality of the soul, inevitability of birth and death, nature of Karmayoga, dignity (glory) of learning, types of devotee and their nature and nature of righteous (Sattviki ) intellect. All these matters are very significant for personality development of a man.

न जायते म्रियते वा कदाचि –
न्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ 1 ॥ (2. 20)

जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ 2 ॥ (2. 27)



कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥ 3 ॥ (2. 39)

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ 4 ॥ (4. 39)

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ 5 ॥ (7. 16)

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैः मुक्तो यः स च मे प्रियः ॥ 6 ॥ (12. 15)

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च यो वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ 7 ॥ (18. 30)

## Glossary

**Noun : (Masc.) लोकः** people **पार्थः** Arjuna (As he is the son of Pritha Kunti he is called पार्थ.) **सङ्गः** attachment

**(Fem.) प्रवृत्तिः** activeness **निवृत्तिः** inactiveness

**Adjective : अजः** unborn **नित्यः** everlasting (soul) (आत्मा) **शाश्वतः** eternal **पुराणः** having no beginning (आत्मा) **हन्यमाने ( शरीरे )** when body perishes **ध्रुवः ( मृत्युः )** certain (death) **ध्रुवम् ( जन्म )** certain, definite (birth) **पराम् ( शान्तिम् )** to eternal (peace) **आर्तः** unhappy **सात्त्विकी ( बुद्धिः )** virtuous/righteous (men - intellect having सत्त्वगुण) (The other two are राजसी and तामसी.)

**Adverb : भूयः** again **कदाचन** sometimes

**Compound :** गीतामृतम् (गीतायाः अमृतम् – षष्ठी तत्पुरुष)। अपरिहार्ये (न परिहार्यम्, तस्मिन् – नञ् तत्पुरुष)। कर्मफलहेतुः (कर्मणः फलम्, कर्मफलम्, (षष्ठी तत्पुरुष) कर्मफलस्य हेतुः – षष्ठी तत्पुरुष)। अकर्मणि (न कर्म, अकर्म, तस्मिन् – नञ् तत्पुरुष)। संयतेन्द्रियः (संयतानि इन्द्रियाणि यस्य सः – बहुव्रीहि)। हर्षामर्षभयोद्वेगैः (हर्षः च अमर्षः च भयम् च उद्वेगः च इति हर्षामर्षभयोद्वेगाः, तैः हर्षामर्षभयोद्वेगैः – इतरेतर द्वन्द्व)। कार्याकार्ये (कार्यम् च अकार्यम् च, कार्याकार्ये – इतरेतर द्वन्द्व)। भयाभये। (भयं च अभयं च – इतरेतर द्वन्द्व)।

**Participle : ( सं.भू.कृ. ) भूत्वा** becoming **लब्ध्वा** gaining **( हे.कृ ) शोचितुम्** for lamenting.

**Root : First Gana (Parasmaipada) अधि + गम् > गच्छ् ( अधिगच्छति )** to acquire **(Atmanepada) लभ् ( लभते** to gain **) भज् ( भजते )** to worship **उद् + विज् ( उद्विजते )** to be perplexed

## Notes

**1. Meaning : न जायते** is not born **म्रियते न** does not die **भविता वा न भूयः** nor will be again **न हन्यते** is not killed **हन्यमाने शरीरे** when perishable body perishes **जातस्य** of one who is born **अपरिहार्ये अर्थे** in the unavoidable matter **मा कर्मफलहेतुः भूः** don't be desirous of reward of deeds **अकर्मणि ते सङ्गः मा अस्तु** may you not be inactive, may you not be attached to inaction **तत्परः** following that **संयतेन्द्रियः** one, who has controlled his senses **चतुर्विधाः** of four kinds **सुकृतिनः** meritorious persons (One becomes virtuous only by doing good deeds.) **जिज्ञासुः** desirous of knowing (A person worships god only and only with a desire of knowing god is जिज्ञासु भक्त.) **अर्थार्थी** desirous of worldly objects (One, worshipping god with a desire to get worldly objects like wealth, position, son etc.) **ज्ञानी** learned (One who has realised imperishable world, immortal soul and god's nature (form) is ज्ञानी भक्त.) **भरतर्षभ** O best king of Bharat dynasty/Arjuna ! **न उद्विजते** not perplexed **न उद्विजते च यः** who himself is not perplexed **हर्षामर्षभयोद्वेगैः** by joy, intolerance, fear and anxiety **मुक्तः** free **कार्याकार्ये** during work and in absence of work **भयाभये** in fear and (absence of fear) fearlessness. **बन्धनं मोक्षं च** to bondage and salvation **वेत्ति** knows **सात्त्विकी** is good (Satvik).

**2. Sandhi :** नायम् (न अयम्)। अजो नित्यः (अजः नित्यः)। शाश्वतोऽयम् (शाश्वतः अयम्)। पुराणो न (पुराणः न)। ध्रुवो मृत्युः (ध्रुवः मृत्युः)। तस्मादपरिहार्येऽर्थे (तस्मात् अपरिहार्ये अर्थे)। कर्मण्येवाधिकारस्ते (कर्मणि एव अधिकारः ते)। कर्मफलहेतुर्भूः (कर्मफलहेतुः भूः)। सङ्गोऽस्त्वकर्मणि (सङ्गः अस्तु अकर्मणि)। शान्तिमचिरेणाधिगच्छति (शान्तिम् अचिरेण अधिगच्छति)। सुकृतिनोऽर्जुन (सुकृतिनः अर्जुन)। आर्तो जिज्ञासुरर्थार्थी (आर्तः जिज्ञासुः अर्थार्थी)। यस्मान्नोद्विजते लोको लोकान्नोद्विजते (यस्मात् न उद्विजते लोकः लोकात् न उद्विजते)। मुक्तो यः (मुक्तः यः)। स च (सः च)। यो वेत्ति (यः वेत्ति)।

## Exercise

**1. विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) कः न जायते म्रियते वा कदाचित् ? ◯

(क) मनुष्यः (ख) भक्तः (ग) आत्मा (घ) देहः

(2) कस्य मृत्युः ध्रुवः ? ◯

(क) पदार्थस्य (ख) जातस्य (ग) धनस्य (घ) आत्मनः

(3) कस्मिन् अर्थे त्वं न शोचितुमर्हसि ?

(क) अपरिहार्ये (ख) परिहार्ये (ग) मरणे (घ) दुःखे

(4) कस्मिन् ते सङ्गः न स्यात् ?

(क) कर्मणि (ख) अकर्मणि (ग) ज्ञाने (घ) धने

(5) ज्ञानं कः लभते ?

(क) भक्तिमान् (ख) गुणवान् (ग) श्रद्धावान् (घ) धनवान्

(6) कतिविधाः भक्ताः भवन्ति ?

(क) चतुर्विधाः (ख) द्वाविधौ (ग) त्रिविधाः (घ) एकविधः

## 2. एकवाक्येन संस्कृतभाषयाम् उत्तरत ।

(1) अजः नित्यः शाश्वतः पुराणः कः ?

(2) मृतस्य किं ध्रुवम् ?

(3) कस्मिन् ते अधिकारः अस्ति ?

(4) कदा शान्तिम् अधिगच्छति ?

(5) कः भक्तः भगवतः प्रियः ?

## 3. वचनानुसारं शब्दरूपैः रिक्तस्थानानि पूरयत ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | शरीरे | ............... | ............... |
| (2) | ............... | ............... | जनाः |
| (3) | लोकात् | ............... | ............... |
| (4) | प्रवृत्तिः | ............... | ............... |

## 4. रिक्तस्थानानां पूर्तिः विधेया ।

(1) न ............... म्रियते वा कदाचित् आत्मा।

(2) कर्मण्येवाधिकारस्ते मा ............... कदाचन।

(3) आर्तो जिज्ञासुरर्थार्थी ............... च भरतर्षभ।

(4) बन्धं मोक्षं च यो वेत्ति सा ............... सात्त्विकी।

**5. रेखाङ्कितपदानां स्थाने प्रश्नवाचकं पदं लिखित्वा प्रश्नवाक्यं रचयत।**

(कम्, कीदृशे, किम्, कीदृशी, कस्य)

(1) आत्मा <u>हन्यमाने</u> शरीरे न हन्यते।

(2) <u>ज्ञानं</u> लब्धा शान्तिम् अधिगच्छति।

(3) सुकृतिनः जनाः <u>मां</u> भजन्ते।

(4) सा बुद्धिः <u>सात्त्विकी</u> वर्तते।

**6. सन्धिविच्छेदं कुरुत ।**

(1) अजो नित्यः। ...............

(2) शाश्वतोऽयम्। ...............

(3) कर्मण्येवाधिकारस्ते। ...............

(4) सङ्गोऽस्त्वकर्मणि। ...............

**7. समासप्रकारं लिखत ।**

(1) गीतामृतम् ...............

(2) अपरिहार्ये। ...............

(3) संयतेन्द्रियः। ...............

(4) हर्षामर्षभयोद्वेगाः ...............

(5) भयाभये। ...............

**8. अधस्तनयोः श्लोकयोः पूर्तिं कुरुत ।**

(1) जातस्य हि ......................... शोचितुमर्हसि॥

(2) यस्मान्नोद्विजते ......................... मे प्रियः॥

**9. अर्थविस्तारं कुरुत ।**

(1) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥

(2) श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

(3) चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

**Activity**

- Read Bhagvad-Geeta with English translation.
- Write other 3/4 verses of the Geeta of your choice and translate them.

# 14. क इदं दुष्करं कुर्यात्

In 4th century B. C. Magadha was ruled over by Nanda dynasty. Vishnugupta, who was born in Pataliputra, the capital of Magadha, brought to an end the tyrannical ruling of Nanda. Vishnugupta was the Acharya (teacher) of science of politics in Takshashila Vidyapitha. He was a teacher by profession, but was proficient in politics. He took keen interest in politics to unite divided states and make people free from tyranny of Nanda and unite India as a whole. Known as Acharya Kautilya, he taught science of politics to an ordinary child Chandragupta. When Chandragupta Maurya successfully passed out all the tests taken by him, he coronated this worthy disciple on the throne of Magadha. Vishakhadatta, whose probable date is 7th to 9th century, has written a seven-act play named मुद्राराक्षसम् selecting this historical event as theme. The present excerpt is an edited version of one of the scenes from the 1st act of this play.

King Nanda had a minister named Amatya Rakshasa, who was very gentle, loyal and affectionate to his people. With the downfall of Nanda dynasty, Amatya Rakshasa was also deposed and went away to unknown place in disguise. Amatya was dutiful and loyal to his country. So Chanakya wanted to appoint him as a minister of Chandragupta. So he calls a merchant named Chandanadasa to get information about Amatya Rakshasa. Chandanadasa was his personal friend and had given shelter to Rakshasa's family at his home. When Chanakya gets this news, he calls Chandanadasa and asks him to find out Amatya Rakshasa. Relative dialogue between Chanakya and Chandanadasa is presented here.

Chandanadasa's loyalty towards his friend is beautifully depicted here. Chandanadasa becomes ready to protect his friend and his family even at the cost of his life and proves that the friend is more than even his life. Chandanadasa's love for his friend makes Chanakya delighted. You have to learn potential participles used in the lesson.

---

**चाणक्यः** - (स्वशिष्यं प्रति) वत्स, श्रेष्ठी चन्दनदासः अत्र आनेतव्यः।

**शिष्यः** - यदाज्ञापयति उपाध्यायः।

(इति निष्क्रम्य चन्दनदासेन सह पुनः प्रविश्य)

**चन्दनदासः** - (स्वगतम्) चाणक्यः यदा आह्वयति तदा निर्दोषस्य अपि शङ्का वर्धते किं पुनः जातदोषस्य। अत एव मया अमात्यराक्षसस्य गृहजनोऽन्यत्र प्रेषितः। मम तावत् यद्भवति तद्भवतु नाम।

**शिष्यः** - भोः श्रेष्ठिन् ! इतः इतः।

**चन्दनदासः** - अयमागतोऽस्मि। (उभौ परिक्रामतः।)

**शिष्यः** - उपाध्याय, अयं श्रेष्ठी चन्दनदासः।

**चन्दनदासः** - (उपसृत्य) जयतु जयत्वार्यः।

**चाणक्यः** - श्रेष्ठिन्, स्वागतं ते। इदमासनम्, तत्र स्थातव्यम्।

**चन्दनदासः** - यदार्य आज्ञापयति। (उपविष्टः।)

**चाणक्यः** - अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः वः।

**चन्दनदासः** - (स्वगतम्) अत्यादरः शङ्कनीयः। (प्रकाशम्) आर्य ! अथ किम्, आर्यस्य प्रसादेन अखण्डिता मे वाणिज्या।



**चाणक्यः** – भोः श्रेष्ठिन् ! अपि कदाचित् चन्द्रगुप्तस्य दोषान् पूर्वनृपतेः नन्दस्य गुणान् अधुना स्मरन्ति प्रकृतयः ?

**चन्दनदासः** – शान्तं पापम्। शारदनिशासमुद्गतेन पूर्णिमाचन्द्रेण अधिकं नन्दन्ति प्रकृतयः।

**चाणक्यः** – भोः श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति प्रकृतयः।

**चन्दनदासः** – आज्ञापयतु आर्यः। किं कियत् च अर्थजातम् अस्माज्जनादिष्यते।

**चाणक्यः** – भोः श्रेष्ठिन्, चन्द्रगुप्तराज्यमिदं, न नन्दराज्यम्। अर्थः तु नन्दाय एव रोचते स्म, चन्द्रगुप्तस्य तु प्रजानां परिक्लेशाभावे एव रुचिः।

**चन्दनदासः** – (सहर्षम्) अनुगृहीतोऽस्मि।

**चाणक्यः** – स च परिक्लेशाभावः कथमाविर्भवतीति न प्रष्टव्यम्।

**चन्दनदासः** – आज्ञापयतु आर्यः।

**चाणक्यः** – संक्षेपतः नृपतिं प्रति अविरुद्धा वृत्तिः वर्तितव्या।

**चन्दनदासः** – कः पुनः अधन्यो नृपतेः विरुद्धमाचरति।

**चाणक्यः** – भवानेव तावत् प्रथमः।

**चन्दनदासः** – शान्तं पापम् शान्तं पापम्। कीदृशस्तृणानाम् अग्निना सह विरोधः।

**चाणक्यः** – अयम् ईदृशः विरोधः यत् त्वमद्यापि राजविरोधिनः अमात्यराक्षसस्य गृहजनं स्वगृहम् अभिनीय रक्षसि।

**चन्दनदासः** – आर्य, अलीकमेतत्, केनापि अनभिज्ञेन आर्यस्य एतत् निवेदितम्।

**चाणक्यः** – भोः श्रेष्ठिन् ! अलमाशङ्कया। भीताः पूर्वराजपुरुषाः पौराणां गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततः तत्प्रच्छादनमेव दोषमुत्पादयति।

**चन्दनदासः** – एवं नु इदम्। तस्मिन् समये अमात्यराक्षसस्य गृहजनः मम गृहे आसीत्।

**चाणक्यः** – प्रथमम् अनृतम्, इदानीम् आसीत् इति परस्परविरुद्धे वचने।

**चन्दनदासः** – एतावदेव अस्ति मे वाक्छलम्।

**चाणक्यः** - भोः श्रेष्ठिन् ! चन्द्रगुप्तस्य राज्ये अपरिग्रहः छलानाम्। तत् समर्पयितव्यः राक्षसस्य गृहजनः। अच्छलेन भवितव्यम् भवता।

**चन्दनदासः** - आर्य ! ननु विज्ञापयामि, तस्मिन् समये आसीत् मम गृहे अमात्यराक्षसस्य गृहजनः।

**चाणक्यः** - अथ इदानीं क्व गतः।

**चन्दनदासः** - न जानामि कुत्र गतः।

**चाणक्यः** - कथं न जानासि नाम। भोः श्रेष्ठिन् चन्दनदास ! राजविरोधिषु तीक्ष्णदण्डः नृपतिः चन्द्रगुप्तः। सः न मर्षयिष्यति राक्षसकलत्रस्य प्रच्छादनं भवतः। तत् रक्षितव्यं परकलत्रेण आत्मनः कलत्रं जीवितं च।

**चन्दनदासः** - आर्य, किं मे भयं दर्शयति भवान्। सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनः असन्तम्।

**चाणक्यः** - चन्दनदास, एष एव ते निश्चयः।

**चन्दनदासः** - बाढम्, एष मे स्थिरः निश्चयः।

**चाणक्यः** - (स्वगतम्) साधु चन्दनदास ! साधु।

सुलभेष्वर्थलाभेषु परसंवेदने जनः ।
क इदं दुष्करं कुर्यात् इदानीं शिबिना विना ॥

## Glossary

**Noun (Masc.) : चाणक्यः** name of Kautilya, chief minister of Pataliputra **वत्सः** son, disciple **चन्दनदासः** name of a rich merchant **उपाध्यायः** Guru, preceptor (Upadhyaya is one to whom one approaches for studies.) **गृहजनः** family-member **प्रसादः** grace, favour **अर्थः** wealth, money **अपरिक्लेशः** lack of sorrow/unhappiness **अधन्यः** unlucky **अमात्यराक्षसः** chief minister of king Nanda named Amatya Rakshasa **आर्यः** noble (This word is used in Sanskrit to address someone respectfully. Moreover it is said कर्तव्यमाचरन् कर्म अकर्तव्यमनाचरन्। तिष्ठति प्रकृताचारे स वै आर्य इति स्मृतः॥ One who practises what is worthy to be done and does not practise what is not worthy is called Arya.) **अनभिज्ञेन** by unknown person **चन्द्रगुप्तः** a disciple of Chanakya, a king seated on the throne of Pataliputra after dethroning Nanda dynasty.) **पौरः** citizen

**(Fem.) : वाणिज्या** livelihood, business **प्रकृतिः** people, subjects (of king) **वृत्तिः** behaviour

**(Neu.) : अलीकम्** false **प्रच्छादनम्** act of hiding **अनृतम्** untruth **कलत्रम्** wife (here family) **जीवितम्** life **गेहम्** house.

**Pronoun : उभौ** (m.) both इदम् (n.) this **अस्मात्** (m. n.) from this **भवताम्** you **कः** (m.) who **एतत्** (n.) this

**Adjective : अखण्डिता ( वाणिज्या )** (bussiness) without any break **शारदनिशासमुद्गतेन ( पूर्णिमाचन्द्रेण )** by (the moon of full-moon day) of autumnal night **पूर्वनृपतेः ( नन्दस्य )** of former king (Nanda) **कियत् ( अर्थजातम् )** how much (wealth) **प्रीताभ्यः ( प्रकृतिभ्यः )** from pleased/delighted (people) **अविरुद्धा ( वृत्तिः )** favourable (behaviour) **भीताः ( पूर्वराजपुरुषाः )** frightened, (former courtiers) **परस्परविरुद्धे ( वचने )** contradictory (statements) **तीक्ष्णदण्डः ( नृपतिः )** (king) giving severe punishment **स्थिरः ( निश्चयः )** steady/firm (decision) **सुलभेषु ( अर्थलाभेषु )** in easily obtainable (financial profit)

**Adverb :** **प्रति** towards **अत एव** therefore, hence **अन्यत्र** elsewhere **इतः इतः** from this side, this side **अपि** also (shows meaning of possibility) **अथ किम्** what then **संक्षेपतः** in short **अद्यापि** even to-day **अलम्** enough **नु** indeed (used in sense of certainty) **कुत्र** where **कथम्** why **बाढम्** surely (used in sense of acceptance) **साधु** well, OK **कीदृशः** of what kind **ईदृशः** such.

**Compound :** स्वशिष्यम् (स्वस्य शिष्यः, तम् – षष्ठी तत्पुरुष)। जातदोषस्य (जातः दोषः यस्य सः, तस्य – बहुव्रीहि)। गृहजनः (गृहस्य जनः – षष्ठी तत्पुरुष)। वृद्धिलाभाः (वृद्धेः लाभः, ते – षष्ठी तत्पुरुष)। अखण्डिता (न खण्डिता – नञ् तत्पुरुष)। पूर्वनृपतेः (पूर्वस्य नृपतिः, तस्य – षष्ठी तत्पुरुष)। शारदनिशासमुद्गतेन (शारदस्य निशा शारदनिशा (षष्ठी तत्पुरुष), शारदनिशायां समुद्गतः, तेन – सप्तमी तत्पुरुष)। पूर्णिमाचन्द्रेण (पूर्णिमायाः चन्द्रः, तेन – षष्ठी तत्पुरुष)। प्रतिप्रियम् (प्रतिगतं प्रियम्)। चन्द्रगुप्तराज्यम् (चन्द्रगुप्तस्य राज्यम् – षष्ठी तत्पुरुष)। नन्दराज्यम्। (नन्दस्य राज्यम् – षष्ठी तत्पुरुष)। परिक्लेशाभावे (परिक्लेशस्य अभावः, तस्मिन् – षष्ठी तत्पुरुष)। अविरुद्धा (न विरुद्धा – नञ् तत्पुरुष)। अधन्यः (न धन्यः – नञ् तत्पुरुष)। राजविरोधिनः (राज्ञः विरोधिनः – षष्ठी तत्पुरुष)। स्वगृहम् (स्वस्य गृहम्, तस्मिन् – षष्ठी तत्पुरुष))। अनभिज्ञेन (न अभिज्ञः, तेन – नञ् तत्पुरुष)। पूर्वराजपुरुषाः (राज्ञः पुरुषाः, राजपुरुषाः (षष्ठी तत्पुरुष), पूर्वे च ते राजपुरुषाः – कर्मधारय)। देशान्तरम् (अन्यः देशः – कर्मधारय)। अनृतम् (न ऋतम् – नञ् तत्पुरुष)। परस्परविरुद्धे (परस्परस्मात् विरुद्धम्, ते – पञ्चमी तत्पुरुष)। वाक्छलम् (वाचः छलम् – षष्ठी तत्पुरुष))। अपरिग्रहः (न परिग्रहः – नञ् तत्पुरुष)। तीक्ष्णदण्डः (तीक्ष्णः दण्डः यस्य सः – बहुव्रीहि)। नृपतिः (नृणाम् पतिः – षष्ठी तत्पुरुष)। राक्षसकलत्रस्य (राक्षसस्य कलत्रम्, तस्य – षष्ठी तत्पुरुष)। परकलत्रेण (परस्य कलत्रम्, तेन – षष्ठी तत्पुरुष))। असन्तम् (न सत्, तम् – नञ् तत्पुरुष) अर्थलाभेषु (अर्थस्य लाभाः, तेषु – षष्ठी तत्पुरुष)। परसंवेदने (परस्य संवेदनम्, तस्मिन् – षष्ठी तत्पुरुष)।

**Participle : ( सं.भू.कृ. )** **निष्क्रम्य** existing **प्रविश्य** entering **अभिनीय** taking, leading **निक्षिप्य** placing **( क.भू.कृ )** **प्रेषितः** sent **आगतः** came **उपविष्टः** sat **अनुगृहीतः** obliged **निवेदितम्** reported **भीताः** frightened **गतः** went **( वि.कृ. )** **आनेतव्यः** should be brought **स्थातव्यम्** should stay **प्रष्टव्यम्** should be asked **वर्तितव्या** should behave **समर्पयितव्यः** should be handed over **भवितव्यम्** should happen **रक्षितव्यम्** should be protected/saved.

**Root : (first Gana) (parasmaipada)** **जि ( जयति )** to win, to conquer **नन्द् ( नन्दति )** to be glad **व्रज् ( व्रजति )** to go **आ + ह्वे > ह्वय् ( आह्वयति )** to call

**(Atmanepada)** **वृध् ( वर्धते )** to grow, to prosper

**Tenth Gana (Parasmaipada)** **मर्ष् ( मर्षयति )** to pardon, to forbid

## Notes

**1. Meaning :** **श्रेष्ठी** merchant **स्वगतम्** to oneself (a sentence spoken in a way which can be heard to oneself) **जातदोषस्य** to one, who has committed mistake **मम तावत् यद्भवति तद्भवतु नाम** let it happen what is happening to me (come what may) उभौ परिक्रामतः both of them turn around (sentences given in bracket are dramatical instructions according to which a character has to enact during the play) **प्रचीयन्ते** are growing/increasing **संव्यवहाराणाम्** of buying and selling **वृद्धिलाभाः** profits of growth of bussiness **प्रकाशम्** loudly, aloud (Generally all the dialogues of drama are spoken aloud, but when स्वगत उक्ति is completed, this instruction is given to start speaking dialogues loudly.) **आर्यस्य प्रसादेन** by the grace of noble one **प्रकृतयः अपि** people too **प्रतिप्रियम्** favourable in return

**अर्थजातम्** lots of wealth **ईष्यते** is desired **परिक्लेशाभावे** in absence of sorrow **सहर्षम्** joyfully **कथमाविर्भवतीति** how it is produced **अलमाशङ्क्या** stop doubting **देशान्तरं व्रजन्ति** go to another region **तत्प्रच्छादनमेव** hiding of them/of frauds **दोषमुत्पादयति** creates crime **वाक्छलम्** trick of speech **छलानाम्** of fault **अपरिग्रहः** non-acceptance **अच्छलेन** being free from fraud **भवता भवितव्यम्** you should be/ become **न मर्षयिष्यति** will not pardon **गेहे सन्तमपि** although existing in the house **न समर्पयामि** I may not offer/hand over **किं पुनः असन्तम्** then what when not existing (in the house) **परसंवेदने** in sorrows of others **दुष्करम्** difficult **शिबिना विना** except Shibi (In olden days a king named Shibi gave away flesh from his body to the hawk for protecting a dove, who had come to his refuge. Shibi was unaware of the fact that this happened only to test him.)

**2. Sandhi :** गृहजनोऽन्यत्र (गृहजनः अन्यत्र)। यद्भवति (यत् भवति)। तद्भवतु (तत् भवतु)। अयमागतोऽस्मि (अयम् आगतः अस्मि)। अस्माज्जनादिष्यते (अस्मात् जनात् इष्यते)। अनुगृहीतोऽस्मि (अनुगृहीतः अस्मि)। कथमाविर्भवतीति (कथम् आविर्भवति इति)। कीदृशस्तृणानाम् (कीदृशः तृणानाम्)। त्वमद्यापि (त्वम् अद्य अपि)। एष एव (एषः एव)। एष मे (एषः मे)। क इदानीम् (कः इदानीम्)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) चन्दनदासेन अमात्यराक्षसस्य गृहजनः कुत्र निर्वाहितः ? ◯

(क) स्वगृहे (ख) अन्यत्र (ग) मित्रगृहे (घ) अरण्ये

(2) नन्दाय किं रोचते स्म ? ◯

(क) अर्थः (ख) प्रजाकल्याणम् (ग) युद्धम् (घ) धर्मवृद्धिः

(3) तृणानाम् ............. सह विरोधः कीदृशः ? ◯

(क) अग्निम् (ख) अग्निना (ग) अग्नेः (घ) अग्निः

(4) चन्दनदासः स्वगतं वदति, अहं तु ............. । ◯

(क) निर्दोषः (ख) साशङ्कः (ग) मुक्तदोषः (घ) जातदोषः

(5) भीताः पूर्वराजपुरुषाः पौराणां गृहेषु गृहजनं निक्षिप्य देशान्तरं ............. । ◯

(क) व्रजति (ख) व्रजतः (ग) व्रजन्ति (घ) व्रजन्ते

(6) चाणक्यः यदा आह्वयति तदा ............. अपि साशङ्कः भवति। ◯

(क) निर्दोषः (ख) निर्दोषाः (ग) निर्दोषेन (घ) निर्दोषैः

**2. एकवाक्येन संस्कृतभाषायाम् उत्तरत ।**

(1) चाणक्यः स्वशिष्याय किं कथयति ?

(2) चन्द्रगुप्ताय किं रोचते ?

(3) भूपाः प्रीताभ्यः प्रकृतिभ्यः किम् इच्छन्ति ?

(4) भीताः राजपुरुषाः कुत्र गृहजनं निक्षिपन्ति ?

**3. अधोलिखितानां कृदन्तानां प्रकारं लिखत ।**

| | | | |
|---|---|---|---|
| (1) निष्क्रम्य | ............... | (2) निर्वाहितः | ............... |
| (3) शङ्कनीयः | ............... | (4) इष्टः | ............... |
| (5) प्रष्टव्यम् | ............... | (6) निक्षिप्य | ............... |

**4. समासप्रकारं लिखत ।**

| | | | |
|---|---|---|---|
| (1) जातदोषः | ............... | (2) वृद्धिलाभाः | ............... |
| (3) नन्दराज्यम् | ............... | (4) परकलत्रम् | ............... |
| (5) देशान्तरम् | ............... | | |

**5. वचनानुसारं धातुरूपैः रिक्तस्थानानि पूरयत ।**

| | | | |
|---|---|---|---|
| (1) | इच्छामि | ............... | ............... |
| (2) | ............... | ............... | व्रजन्ति |
| (3) | ............... | परिक्रामतः | ............... |
| (4) | पराजेष्यति | ............... | ............... |

**6. रेखाङ्कितानां पदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।**

(केन, कः, किम्, कीदृशम्, कस्य)

(1) <u>नन्दस्य</u> अर्थसम्बन्धः प्रीतिजनकः।

(2) एतत् <u>प्रच्छादनदोषम्</u> उत्पादयति।

(3) <u>अमात्यराक्षसः</u> चन्द्रगुप्तं न पराजेष्यति।

(4) शिष्यः <u>चन्दनदासेन</u> सह प्रविशति।

**7. आङ्ग्लभाषया उत्तराणि लिखत ।**

(1) How does Chanakya show respect towards Chandanadasa ?

(2) According to Chanakya, in what matter does Chandragupta's kingdom differ from that of Nanda ?

(3) Why does Chanakya believe (consider) Chandanadasa, the first opponent of Chandragupta ?

(4) How does Chanakya threaten Chandanadasa ?

(5) What is Chandanadasa's reply for not entrusting family of Amatya Rakshasa ?

**Activity**

- Collect information about life of Vishnugupta (Kautilya).
- Use inspiring statements of Chankya as today's thought in your school.

# 15. जयः पराजयो वा

The concsequences of war are always very furious. Even then man constantly goes on fighting. In modern age different chemical weapons are used in war, which have become very harmful. The subject matter of the present lesson is its description.

In olden days battles were faught and large number of people were killed in it. As a result many ladies and children used to become helpless. But natural elements like earth, water, air, sky etc were not damaged. They had been pure as earlier. In modern age excessive use of weapons has polluted all these natural elements. Many people become the victim of incurable diseases because of polluted water and air and though they do not participate actively in war, even then they have to die. Not only this, but many future descendants of mankind have to become the victim of such bad consequences.

In a war, resulting in such bad consequences whichever party becomes victorious, it remains a question whether it is a victory or defeat. Arjuna, living in heaven, having come down on the earth, witnesses directly the differences of consequeuces of the wars between modern age and Mahabharata times. By imagining the heavenly character getting down on the earth the attention has been drawn towards the bad results of the war prevalent at the present time. The plot of this lesson has been thought to educate the feelings of living away from the war by understanding the miseries which the innocent beings have to suffer as a result of war.

---

एकदा स्वर्गस्थितः अर्जुनः पृथिवीं द्रष्टुकामः भूलोकमागच्छत्। प्राप्तभूलोकः सः महान्तं जयघोषं श्रुतवान्। सः जयघोषकारकं जनसमूहस्य समीपं गच्छति। सद्यः विरमिते विश्वयुद्धे लब्धविजयाः जनाः विजयोत्सवम् अनुभावयन्तः आसन्। तान् दृष्ट्वा अर्जुनोऽपि पुरातनं महाभारतविजयं तदानीन्तनान् प्राप्तविजयान् जनान् च स्मरति। एतम् अपरिचितपूर्वं समुपस्थितम् अर्जुनं ते जनाः स्वकीये विजयोत्सवे योजितवन्तः। अर्जुनोऽपि जातहर्षः तैः सह संलग्नोऽभवत्।

कञ्चित्कालानन्तरं सः तृषामनुभूतवान्। अभ्यागतेन तेन अश्व एको याचितः। याचिताश्वोऽसौ अश्वमारुह्य जलं पातुं नगराद्बहिः स्थितमेकं परिचितपूर्वं सरोवरं गतवान्। तत्र यदा सः जलपानाय उद्यतो भवति, तदा कस्यचित् पुरुषस्य ध्वनिं श्रुतवान् – ''महाशय, सगरम् इदं जलम्। अधुना अपेयमस्ति।'' अर्जुनः साश्चर्यः तमदृष्टपूर्वं पुरुषं पृच्छति, ''कथमिदं सगरं जलम्। प्रकृतिनिर्मिताः सरोवराः तु सर्वदैव पेयजलाः एव भवन्तीति।''

स्वरेण युवकः कायेन वृद्धः इव कश्चित् भग्नदन्तः धवलकेशः सदण्डः एकः जनः अर्जुनस्य समीपमागतवान्। अदृष्टपूर्वं तादृशं जनं दृष्ट्वा अर्जुनः आश्चर्यचकितः सञ्जातः। महाभारतकालिकान् स्थूलकायान् बलिष्ठान् जनान् स्मरन् स कष्टमपि अनुभूतवान्। अस्य एतादृशीं स्थितिं दृष्ट्वा अर्जुनः साश्चर्यं पृष्टवान् – ''को भवान् ? कस्मात् तव ईदृशी अवस्था जाता।''



स प्रत्यवदत् – "अहम् अस्य देशस्य एकः सैनिकः। विगतेषु कतिपयेषु मासेषु बहूनां देशानां परस्परं युद्धम् अभवत्। तत्र विविधानि शस्त्राणि प्रयुक्तानि। तस्मात् कारणात् जलं स्थलं वायुः प्राणिनः इत्येवं बहुविधं जगत् विविधरूपेण प्रभावितमस्ति। किं ते कथयामि, शस्त्रास्त्रनिर्गतैः प्रदूषितैः सर्वं वस्तुजातं प्रदूषितं विषमयं च सञ्जातम्। अस्य सरोवरस्य जलमपि एतस्मादेव कारणात् सगरमस्ति। अत्रत्यं जलं पीत्वा पीत्वा मदीया एषा स्थितिः सञ्जाता। मदीयः पुत्रः इदमेव जलं पीत्वा विगतदृष्टिः गभीरे कूपे पतितो मृतश्च। मदीया भार्या विषमयस्य वायोः प्रभावेन निरुद्धश्वासा दिवंगता। प्रतिदिनं जलस्यास्य पानेन गतप्राणान् जीवान् पश्यन् भुक्तभोगः अहमत्र स्थित्वा पशुपक्षिमानवान् अस्य जलपानात् वारयामि।"

अर्जुनः वृत्तान्तमेतं श्रुत्वा पुरातनीयस्य महाभारताभिधस्य युद्धस्य परिणामं स्मृतिपथमानयति। स विचारयति यत् तदा बहूनां जनानां संहारः सञ्जातः, तेन च परिवारेषु आपदानां परम्परा प्रवर्तिता। परन्तु जलवायुभूम्याकाशादयो महाभूतास्तथैव शुद्धाः आसन्। ते जीवानां कृते यथापूर्वम् उपयोगिनः एवासन्। सम्प्रति यदहं पश्यामि तत् अधिकं शोचनीयमस्ति। किमयम् अधुना प्रवर्तितः मावनस्य जयः, जयः अस्ति पराजयो वा ? एवं सशोकः अर्जुनः अपीतजलः एव गृहीतचिन्तश्च पुनः स्वर्गं प्रत्यावर्तत।

## Glossary

**Noun (Masc.) : अर्जुनः** Arjuna, a great warrior of Mahabharata (Here, his character is imaginative.) **भूलोकः** earth **महाशयः** nobleminded (महाशय is used as a संबोधन for good person.) **अभ्यागतः** guest **सरोवरः** lake, big pond **जीवः** living being **परिणामः** consequences **महाभूताः** primary elements (earth, water, light, air and sky) **पराजयः** defeat **स्वर्गः** heaven, abode of Gods.

**(Fem.) : तृषा** thirst **भार्या** wife **आपदा** calamity **परंपरा** regular succession

**Adjective : स्वर्गस्थितः ( अर्जुनः )** living in heaven (Arjuna) **जयघोषकारकम् ( जनसमूहम् )** (to a group of people) proclaiming victory **विरमिते ( विश्वयुद्धे )** (in battle) which has stopped **लब्धविजयाः ( जनाः )** (people) who have achieved victory **तदानीन्तनान् प्राप्तविजयान् ( जनान् )** to victorious ones belonging to that time (people) **एतम् अपरिचितपूर्वं समुपस्थितम् ( अर्जुनम् )** to (Arjuna) the present one, who was unfamiliar earlier **परिचितपूर्वम् ( सरोवरम् )** to (a lake) which is known formerly **सगरम् इदम् ( जलम् )** this poisonous (water) (गर = poison) **प्रकृतिनिर्मिताः ( सरोवराः )** created by nature (lakes) **भग्नदन्तः धवलकेशः सदण्डः एकः ( जनः )** one (man) having broken teeth, white hair and a stick **अदृष्टपूर्वम् ( जनम् )** who has not been seen before (man) **महाभारतकालिकान् स्थूलकायान् बलिष्ठान् ( जनान् )** is having bulky body and very powerful (people) of Mahabharata times **विगतेषु कतिपयेषु ( मासेषु )** in past several (months) **बहूनाम् ( देशानाम् )** of many (countries) **शस्त्रास्त्रनिर्गतैः प्रदूषितैः ( पदार्थैः )** by polluted objects shot out from arms and weapons **मदीया ( स्थितिः )** my (condition) **मदीयः ( पुत्रः )** my (son) **गभीरे ( कूपे )** in a deep (well) **गतप्राणान् ( जीवान् )** to those (beings) who have lost life.

**Adverb : सद्यः** at once **सर्वदैव** always **इत्येवम्** in his way **प्रतिदिनम्** everyday **कृते** for **यथापूर्वम्** as before **सम्प्रति** at present, now.

**Compound :** स्वर्गस्थितः (स्वर्गं स्थितः – द्वितीया तत्पुरुष)। प्राप्तभूलोकः (प्राप्तः भूलोकः येन सः – बहुव्रीहि)। जयघोषम् (जयस्य घोषः, तम् – षष्ठी तत्पुरुष)। जयघोषकारकम् (जयघोषस्य कारकः, तम् – षष्ठी तत्पुरुष)। जनसमूहम् (जनानां समूहः, तम् – षष्ठी तत्पुरुष)। विश्वयुद्धे (विश्वस्य युद्धम्, तस्मिन् – षष्ठी तत्पुरुष)। लब्धविजयाः (लब्धः विजयः येन सः, ते – बहुव्रीहि)। विजयोत्सवम् (विजयस्य उत्सवः, तम् – षष्ठी तत्पुरुष)। महाभारतविजयम् (महाभारतस्य विजयः, तम् – षष्ठी तत्पुरुष)। अपरिचितपूर्वम् (न परिचितपूर्वम् – नञ् तत्पुरुष)। जातहर्षः (जातः हर्षः

यस्य सः – बहुव्रीहि)। याचिताश्वः (याचितः अश्वः येन सः – बहुव्रीहि)। जलपानाय (जलस्य पानम्, तस्मै – षष्ठी तत्पुरुष)। सगरम् (गरेण सहिततम् – बहुव्रीहि)। अपेयम् (न पेयम् – नञ् तत्पुरुष)। साश्चर्यः (आश्चर्येण सहितः – बहुव्रीहि)। अदृष्टम् (न दृष्टः, तम् – नञ् तत्पुरुष)। प्रकृतिनिर्मिताः (प्रकृत्या निर्मितः, ते – तृतीया तत्पुरुष)। पेयजलाः (पेयं जलं यस्य सः, ते – बहुव्रीहि)। भग्नदन्तः (भग्नाः दन्ताः यस्य सः – बहुव्रीहि)। धवलकेशः (धवलाः केशाः यस्य सः – बहुव्रीहि)। सदण्डः (दण्डेन सहितः – बहुव्रीहि)। अदृष्टपूर्वम् (न दृष्टपूर्वः, तम् – नञ् तत्पुरुष)। आश्चर्यचकितः (आश्चर्येण चकितः – तृतीया तत्पुरुष)। स्थूलकायान् (स्थूलः कायः यस्य सः, तान् – बहुव्रीहि)। विविधरूपेण (विविधं रूपं यस्य सः, तेन – बहुव्रीहि)। शस्त्रास्त्रनिर्गतैः (शस्त्रं च अस्त्रं च शस्त्रास्त्रे, – इतरेतर द्वन्द्व) शस्त्रास्त्रेभ्यः निर्गतम्, तैः – पञ्चमी तत्पुरुष)। विगतदृष्टिः (विगता दृष्टिः यस्य सः – बहुव्रीहि)। निरुद्धश्वासा (निरुद्धः श्वासः यस्याः सा – बहुव्रीहि)। गतप्राणान् (गताः प्राणाः येषां ते, तान् – बहुव्रीहि)। भुक्तभोगः (भुक्तः भोगः येन सः – बहुव्रीहि)। पशुपक्षिमानवान् (पशवः च पक्षिणः च मानवाः च, तान् – इतरेतर द्वन्द्व)। महाभारताभिधस्य (महाभारतम् अभिधा यस्य सः, तस्य – बहुव्रीहि)। स्मृतिपथम् (स्मृतेः पन्थाः, तम् – षष्ठी तत्पुरुष)। जलवायुभूम्याकाशादयः (जलं च वायुः च भूमिः च आकाशः च –जलवायुभूम्याकाशाः, इतरेतर द्वन्द्व), जलवायुभूम्याकाशाः आदिः येषाम् ते –जलवायुभूम्याकाशादयः – बहुव्रीहि)। महाभूताः (महान् चासौ भूतः, ते – कर्मधारय)। अपीतजलः (पीतं जलं येन सः –पीतजलः, बहुव्रीहि, न पीतजलः – नञ् तत्पुरुष)। सशोकः (शोकेन सहितः – बहुव्रीहि)। गृहीतचिन्तः (गृहीता चिन्ता येन सः, – बहुव्रीहि)।

**Participle : ( कर्मणि भू.कृ. ) अनुभूतम्** experienced, felt **समुपस्थितम्** approached **याचितः** begged, requested **सञ्जातः** became, happened **जाता** became **पतितः** fell, down **मृतः** died **प्रवर्तिता** rolled onwards **( कर्तरि भू.कृ. ) श्रुतवान्** heard **अनुभूतवान्** experienced **पृष्टवान्** asked **गतवान्** went **आगतवान्** came **( वि.कृ ) शोचनीयम्** mournful, lamentable **( हे.कृ. ) पातुम्** for drinking **( सं.भू.कृ. ) श्रुत्वा** on hearing

## Notes

**1. Meaning : पृथ्वीं द्रष्टुकामः** desirous of seeing the earth **महान्तं जयघोषं श्रुतवान्** heard loud proclamation of victory **तेन अनुभूतम्** he experienced **समीपं गच्छति** goes near **सद्यः विरमिते विश्वयुद्धे** just after the worldwar had stopped **विजयोत्सवम् अनुभावयन्तः आसन्** were celebrating the victory **तदानीन्तनान्** belonging to that time, contemporary **विजयोत्सवे योजितवन्तः** included in celebration of victory **जातहर्षः** one who is delighted **तैः सह संलग्नोऽभवत्** accompnied them **कञ्चित्कालानन्तरम्** after sometime **तृषामनुभूतवान्** felt thirsty **अभ्यागतेन तेन** he, who has come **अश्व एको याचितः** requested for a horse **याचिताश्वोऽसौ** he, who had asked for a horse **जलपानाय** to drink water **उद्यतो भवति** became ready **अपेयमस्ति** not (good) worthy for drinking **तमदृष्टं पुरुषम्** unfamiliar man **सर्वदैव** always **पेयजलाः एव भवन्तीति** having water worthy for dirnking **स्वरेण युवकः** young in voice **कायेन वृद्धः** old in physique **कश्चित्** some **समीपमागतवान्** came near **आश्चर्यचकितः सञ्जातः** became astonished/surprised **कष्टमपि अनुभूतवान्** also experienced/felt pain **साश्चर्यं पृष्टवान्** surprisingly asked **कस्मात्** why **ईदृशी अवस्था जाता** became such a condition **सः प्रत्यवदत्** he replied **बहुविधम्** of many kinds **किं ते कथयामि** what should I tell you **सर्वं वस्तुजातम्** all the things **अत्रत्यं जलम्** the water of this lake **पीत्वा पीत्वा** drinking often **विगतदृष्टिः** one who has lost eye-sight **विषमयस्य वायोः** of poisonous air **प्रभावेन** with effect

**निरुद्धश्वासा** one suffering from suffocation **दिवंगता** died **पश्यन्** seeing, watching **पशुपक्षिमानवान्** to beasts, birds and human beings **अस्य जलपानात्** from drinking its water **वारयामि** I prevent **स्मृतिपथमानयति** reminds **संहारः** destruction **आपदानां परम्परा प्रवर्तिता** series of calamities had rolled on **परन्तु जलवायुभूम्याकाशादयो महाभूताः** but elements like earth water, light, air, sky etc. **तथैव** as they were **जीवानां कृते** for living beings **शोचनीयमस्ति** is to be lamented/worried **प्रवर्तितः** existing **जयः अस्ति पराजयो वा** is it a victory or defeat ? **स्वर्गं प्रत्यावर्तितः** returned to heaven.

**2. Sandhi :** श्रुतपूर्वोऽयम् ( श्रुतपूर्वः अयम्) । ध्वनिरिति ( ध्वनिः इति) । अर्जुनोऽपि (अर्जुनः अपि) । संलग्नोऽभवत् (संलग्नः अभवत्) । अश्व एको याचितः (अश्वः एकः याचितः) । याचिताश्वोऽसौ (याचिताश्वः असौ) । उद्यतो भवति (उद्यतः भवति) । पतितो मृतश्च (पतितः मृतः च) । स्मृतिपथमानयति (स्मृतिपथम् आनयति) । स विचारयति (सः विचारयति) । महाभूतास्तथैव (महाभूताः तथा एव) । एवासन् (एव आसन्) । पराजयो वा (पराजयः वा) । गृहीतचिन्तश्च (गृहीतचिन्तः च) ।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) अर्जुनः किं द्रष्टुकामः भूलोकम् आगच्छत् ? ◯

(क) युद्धम् (ख) विजयोत्सवम् (ग) पृथिवीम् (घ) जनस्थितिम्

(2) तृषातुरः अर्जुनः कुत्र गतवान् ? ◯

(क) नगरम् (ख) नदीम् (ग) सागरम् (घ) सरोवरम्

(3) प्रकृतिनिर्मिताः सरोवराः कीदृशाः भवन्ति ? ◯

(क) अपेयजलाः (ख) अगाधजलाः (ग) उष्णजलाः (घ) पेयजलाः

(4) युवकः कीदृशः आसीत् ? ◯

(क) भग्नहस्तः (ख) भग्नदन्तः (ग) भग्नदण्डः (घ) भग्नपादः

(5) महाभारतकालिकाः जनाः कीदृशाः आसन् ? ◯

(क) स्थूलकायाः (ख) हतबलाः (ग) कृशकायाः (घ) स्थूलोदराः

(6) भटस्य पुत्रः कीदृशे कूपे पतितः ? ◯

(क) निर्जले (ख) गभीरे (ग) क्षीणजले (घ) विशाले

(7) कीदृशः अर्जुनः पुनः स्वर्गं प्रस्थितः ? ◯

(क) गृहीतचिन्तः (ख) गृहीतजलः (ग) क्रोधाविष्टः (घ) पराजितः

## 2. एकवाक्येन संस्कृतभाषायाम् उत्तरत ।

(1) अर्जुनः कस्य समीपं गच्छति ?

(2) सरोवरस्य जलं कीदृशम् आसीत् ?

(3) अपरिचितः स्वरेण कीदृशः आसीत् ?

(4) सर्वं वस्तुजातं केन प्रदूषितं विषमयं च संजातम् ?

(5) कः विगतदृष्टिः जातः ?

## 3. ह्यस्तनभूतकाले धातुरूपाणि परिवर्तयत ।

(1) स्मरति ...............

(2) पश्यामि ...............

(3) वदति ...............

## 4. समासप्रकारं लिखत ।

(1) लब्धविजयाः ...............

(2) तृषातुरः ...............

(3) धवलकेशः ...............

(4) प्रकृतिनिर्मिताः ...............

(5) सशोकः ...............

## 5. निम्नशब्दरूपाणां विभक्तिं वचनं च लिखत ।

(1) नगरात् ............... ...............

(2) बलिष्ठान् ............... ...............

(3) स्थितिम् ............... ...............

(4) मासेषु ............... ...............

(5) बहूनाम् ............... ...............

## 6. आङ्ग्लभाषायाम् उत्तरत ।

(1) What did the unfamiliar man tell Arjuna, when he went to drink water of the lake ?

(2) On seeing the unfamiliar person, why was Arjuna astonished ?

(3) What things were polluted by arms and weapons used in the war ?

(4) What was the condition of the son of the unfamiliar man ?

(5) What is the difference between war of modern age and that of Mahabharata times ?

### Activity

- Make a pictorial list of difficulties arising from war.
- Collect pictures expressing (showing) terror of war.

# 16. अद्भुतं युद्धम्

Ramayana, composed by Maharshi Valmiki, is famous as an 'Adikavya' (the first poetry). As the Ramayana is an Adikavya, its composer Valmiki is also an Adikavi (the first poet). There are totally seven chapters (Kandas) and twentyfour thousand verses (Shlokas) in this Ramayana. The plot of Ramayana is very famous. Accordingly, the King Dasharatha wished to hand over the throne of Ayodhya to Rama but as per promise given to Kaikeyi Rama had to go to forest. Sita as well as Laxmana also went to the forest along with Rama. Wandering into forest Rama reached the area of Panchavati in Dandakaranya. Here they made a cottage of leaves and started living happily. The description of the incidents occured during this period is given in the fourth Aranyakand of Ramayana. The verses given in this lesson are taken from it.

From this very residence Ravana, the king of Lanka, kidnapped Sita. While kidnapping Sita forcibly Ravana came across Jatayu, the vulture king, on the way. Sita prayed Jatayu for help. Ravana was very powerful. He had various weapons like bow, arrow, chariot etc. while Jatayu had no other weapons except his physical limbs like beak, wings and nails. Knowing well his own limited and Ravana's unlimited strength he challenges Ravana and strives hard to stop him. Unfortunately he did not succeed, still the efforts of Jatayu have made him immortal with the story of Ramayana.

Even being a bird Jatayu fights hard with Ravana because he understands that this is his duty to help a miserable lady even at the cost of his life. The way in which this fight of Jatayu had made Ravana awe-struck for some time has very beautifully been described in this part of poem. The human being has to learn the lesson from this poem that howsoever powerful the tyrannous might be and we might be with ordinary strength, even then at least for once, we should stand against him and fulfil our duty for humanity by trying to abolish the misery of the miserables.

---

ततः पर्वतशृङ्गाभः तीक्ष्णतुण्डः खगोत्तमः।
वनस्पतिगतः श्रीमान् व्याजहार शुभां गिराम् ॥ 1 ॥

यत् कृत्वा न भवेद् धर्मो न कीर्तिः न यशो ध्रुवम्।
शरीरस्य च भवेत् खेदः कस्तत् कर्म समाचरेत् ॥ 2 ॥

निवर्तय गतिं नीचां परदाराभिमर्शनात्।
न तत् समाचरेत् धीरो यत्परोऽस्य विगर्हयेत् ॥ 3 ॥

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ॥ 4 ॥

इत्युक्तः क्रोधताम्राक्षः तप्तकाञ्चनकुण्डलः।
राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रम् अमर्षणः ॥ 5 ॥

तद् बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा।
सपक्षयोर्माल्यवतोः महापर्वतयोरिव ॥ 6 ॥



विददार नखैरस्य तुण्डं पृष्ठे समर्पयन्।
केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥ 7 ॥

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्ज पतगोत्तमः ॥ 8 ॥

स भग्नधन्वा विरथो हताश्वो हतसारथिः।
हस्तेनादाय वैदेहीं पपात भुवि रावणः ॥ 9 ॥

जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून् दश तदा व्यपाहरत् अरिन्दमः ॥ 10 ॥

## Glossary

**Noun (Masc.) : खेदः** dejection **धीरः** resolute **पतगोत्तमः** best of birds **जटायुः** name of a famous character of Ramayana, king of birds **चापम्** a bow **वामबाहुः** left shoulder **अरिन्दमः** one, tormenting enemies

**(Fem.) गिरा** speech **वैदेही** Sita, daughter of the king of Videha

**(Neu.) तुण्डम्** mouth, beak **पृष्ठम्** back

**Pronoun : परः** other, another

**Adjective : पर्वतशृङ्गाभः तीक्ष्णतुण्डः खगोत्तमः वनस्पतिगतः श्रीमान् महातेजाः पतगोत्तमः ( जटायुः )** resembling to peak of mountain, having sharp beak, best of birds, remaining on the tree, glorious, magnificent and best bird (Jatayu) **शुभाम् ( गिराम् )** auspicious (speech) **नीचाम् ( मतिम् )** mean (mind) **त्वं धन्वी ( युवा )** you, having a bow (youth, young man) **सरथः कवची शरी ( रावणः )** with a chariot, armour and arrows (Ravana) **कुशली** safe **वैदेहीम्** to Vaidehi **क्रोधताम्राक्षः तप्तकाञ्चनकुण्डलः राक्षसेन्द्रः अमर्षणः ( रावणः )** having eyes red with anger, earrings like heated gold, king of demons, enraged (Ravana) **सपक्षयोः महापर्वतयोः ( माल्यवतोः )** of two great mountains with wings (two Malyawan mountains) **नखपक्षमुखायुधः ( जटायुः )** having weapons in form of nails, wings and beak (Jatayu) **मुक्तामणिविभूषितम् सशरम् ( चापम् )** (a bow) adorned with an arrow, studded with a diamond 'mukta' **भग्नधन्वा विरथः हताश्वः हतसारथिः ( रावणः )** (Ravana) with broken bow, without chariot, wounded horse and charioteer **खगाधिपः अरिन्दमः ( जटायुः )** (Jatayu) the king of birds and tormentor of enemies

**Adverb : मुहुर्मुहुः** again and again **आशु** quickly

**Compound :** पर्वतशृङ्गाभः (पर्वतस्य शृङ्गम् पर्वतशृङ्गम् (षष्ठी तत्पुरुष), पर्वतशृङ्गस्य आभा इव आभा यस्य सः – (बहुव्रीहि)। तीक्ष्णतुण्डः (तीक्ष्णं तुण्डं यस्य सः – बहुव्रीहि)। खगोत्तमः (खगेषु उत्तमः – सप्तमी तत्पुरुष)। वनस्पतिगतः (वनस्पतिं गतः – द्वितीया तत्पुरुष)। परदाराभिमर्शनात् (परस्य दाराः, परदाराः (षष्ठी तत्पुरुष), परदाराणाम् अभिमर्शनम्, तस्मात् – षष्ठी तत्पुरुष)। सरथः (रथेन सहितः – बहुव्रीहि)। नखपक्षमुखायुधः (नखाः च पक्षौ च मुखं च (नखपक्षमुखानि – इतरेतर द्वन्द्व), नखपक्षमुखानि आयुधानि यस्य सः – बहुव्रीहि)। सशरः (शरेण सहितः, – बहुव्रीहि)। मुक्तामणिविभूषितम् (मुक्ता चासौ मणिः (मुक्तामणिः – कर्मधारय), मुक्तामणिना विभूषितः, तम् – तृतीया तत्पुरुष)। महातेजाः (महत् तेजः यस्य सः – बहुव्रीहि)। पतगोत्तमः (पतगेषु उत्तमः – षष्ठी तत्पुरुष)। भग्नधन्वा (भग्नं धनुः यस्य सः – बहुव्रीहि)। हताश्वः (हताः अश्वाः यस्य सः – बहुव्रीहि)। हतसारथिः (हतः सारथिः यस्य सः – बहुव्रीहि)। गृध्रराजेन (गृध्राणां राजा, तेन – षष्ठी तत्पुरुष)। क्रोधमूर्छितः (क्रोधेन मूर्छितः – तृतीया तत्पुरुष)। खगाधिपः (खगानाम् अधिपः – षष्ठी तत्पुरुष)। वामबाहून् (वामः च असौ बाहुः च, तान् – कर्मधारय)।

**Participle : (सं. भू. कृ.) कृत्वा** doing **आदाय** taking **अतिक्रम्य** attacking

**Root : First Gana (Parasmaipada) पत् (पतति)** to fall

**(Tenth Gana) (Parasmaipada) वि + गर्ह् (विगर्हयति)** to abuse, to censure

## Notes

**1. Meaning : व्याजहार** spoke, said **न भवेद् धर्मः** may not be a duty **न कीर्तिः** may not be glory **न यशो ध्रुवम्** may not be stable fame **शरीरस्य च भवेत् खेदः** may have physical pain **समाचरेत्** would practise **परदाराभिमर्शनात्** by touching other's wife **नीचा** mean **गतिम्** position, situation **निवर्तय** you return/turn back **यत्परः अस्य विगर्हयेत्** that which is censured by others **इत्युक्तः** so said **अमर्षणः राक्षसेन्द्रः** enraged king of demons **अभिदुद्राव पतगेन्द्रम्** ran towards Jatayu, the king of birds **तद् बभूव अद्भुतं युद्धम्** marvellous battle was fought **गृध्रराक्षसयोः** between vulture (Jatayu) and demon (Ravana) **विददार नखैः** scratched with nails **तुण्डं पृष्ठे समर्पयन्** placing the beak on the back **केशान् च उत्पाटयामास** uprooted the hair **चरणाभ्याम्** with two legs **बभञ्ज** broke **हस्तेनादाय** holding in hand **पपात भुवि रावणः** Ravana fell down on the earth (land) **दश वामबाहून्** ten hands of left side **व्यपाहरत्** uprooted

**2. Sandhi :** धर्मो न (धर्मः न)। यशो ध्रुवम् (यशः ध्रुवम्)। कस्तत् (कः तत्)। धीरो यत्परोऽस्य (धीरः यत्परः अस्य)। वृद्धोऽहम् (वृद्धः अहम्)। चाप्यादाय (च अपि आदाय)। इत्युक्तः (इति उक्तः)। राक्षसेन्द्रोऽभिदुद्राव (राक्षसेन्द्रः अभिदुद्राव)। बभूवाद्भुतम् (बभूव अद्भुतम्)। गृध्रराक्षसयोस्तदा (गृध्रराक्षसयोः तदा)। सपक्षयोर्माल्यवतोः (सपक्षयोः माल्यवतोः)। महापर्वतयोरिव (महापर्वतयोः इव)। नखैरस्य (नखैः अस्य)। केशांश्चोत्पाटयामास (केशान् च उत्पाटयामास)। ततोऽस्य (ततः अस्य)। महातेजा बभञ्ज (महातेजाः बभञ्ज)। स भग्नधन्वा (सः भग्नधन्वा)। विरथो हताश्वो हतसारथिः (विरथः हताश्वः हतसारथिः)। हस्तेनादाय (हस्तेन आदाय)। जटायुस्तमतिक्रम्य (जटायुः तम् अतिक्रम्य)। तुण्डेनास्य (तुण्डेन अस्य)।

## Exercise

### 1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।

(1) सीतायाः अपनयनकाले जटायुः कुत्र तिष्ठन् आसीत् ? ◯

(क) वनस्पतिम्　(ख) पर्वतशृङ्गम्　(ग) रथम्　(घ) समीपम्

(2) जटायुः रावणस्य कस्मिन् गात्रे तुण्डं समर्पयत् ? ◯

(क) नेत्रे　(ख) चरणे　(ग) मुखे　(घ) पृष्ठे

(3) क्रोधमूर्च्छितः रावणः जटायुं कथम् अभिजघान ? ◯

(क) तलेन　(ख) हस्तेन　(ग) बाणेन　(घ) खड्गेन

(4) जटायुः तुण्डप्रहारेण किं व्यपाहरत् ? ◯

(क) दश मस्तकानि　(ख) दश मुखानि　(ग) दश दक्षिणबाहून्　(घ) दश वामबाहून्

(5) जटायुः वदति – परदाराभिमर्शनात् नीचां गतिं .................. । ◯

(क) निवर्तय　(ख) निवर्तते　(ग) निवर्तयन्तु　(घ) निवृत्तिः

(6) किं विशेषणं जटायोः पक्षिराजत्वं सूचयति ? ◯

(क) तीक्ष्णतुण्डः　(ख) अरिन्दमः　(ग) महाबलः　(घ) खगाधिपः

### 2. एकवाक्येन संस्कृतभाषायाम् उत्तरत ।

(1) श्रीमान् जटायुः कीदृशीं गिरां व्याजहार ?

(2) जटायुरावणयोः कः वृद्धः, कः च युवा ?

(3) रावणस्य चापं कीदृशम् आसीत् ?

(4) भग्नधन्वा रावणः कुत्र पतितः ?

(5) जटायुः रावणस्य किम् उत्पाटयामास ?

### 3. समासप्रकारं लिखत ।

| | | | |
|---|---|---|---|
| (1) खगोत्तमः | ............... | (2) तीक्ष्णतुण्डः | ............... |
| (3) भग्नधन्वा | ............... | (4) हतसारथिः | ............... |
| (5) वामबाहून् | ............... | (6) क्रोधमूर्च्छितः | ............... |

### 4. उदाहरणानुसारम् अनुस्वारस्य स्थाने परसवर्णम् अनुनासिकं वा लिखत ।

**उदाहरणम् : पर्वतशृंगः　पर्वतशृङ्गः**

(1) तीक्ष्णतुंडः　...............

(2) बभंज　...............

(3) अरिंदमः　...............

**5. वचनानुसारं रूपैः रिक्तस्थानानि पूरयत ।**

| | | | |
|---|---|---|---|
| (1) | ............... | ............... | निवर्तयत |
| (2) | समाचरेत् | ............... | ............... |
| (3) | गमिष्यसि | ............... | गमिष्यथ |

**6. रेखाङ्कितानां पदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत।**

(काम्, कुत्र, कीदृशीम्, कः, केन, कीदृशः)

(1) जटायुः <u>शुभां</u> गिरां व्याजहार।

(2) विरथः रावणः <u>भुवि</u> पपात।

(3) <u>जटायुः</u> तस्य पृष्ठे तुण्डं समर्पयत्।

(4) रावणः <u>वैदेहीम्</u> आदाय गच्छति।

(5) जटायुः <u>तुण्डेन</u> तस्य दश वामबाहून् व्यपाहरत्।

**7. आङ्ग्लभाषायाम् उत्तराणि लिखत ।**

(1) What are the words used by Jatayu to challenge Ravana ?

(2) Which weapons did Jatayu have ?

(3) How did Ravana fall down on the earth ?

(4) What did enraged Ravana do ?

(5) What did Jatayu do at the end ?

**8. जटायोः रावणस्य च कृते प्रयुक्तानि विशेषणानि पृथक् कुरुत।**

कवची, श्रीमान्, अरिन्दमः, भग्नधन्वा, धन्वी, पर्वतशृङ्गाभः, युवा, पतगोत्तमः, विरथः, क्रोधमूर्च्छितः, वृद्धः, तीक्ष्णतुण्डः, महातेजाः।

**Activity**

- Collect stories of other benevolent birds and beasts like Jatayu.
- Arrange an exhibition of pictures of Ramayana describing the events like killing of Jatayu.

●

# 17. स्वाभाविकं सादृश्यम्

Nearly twenty six hundread years ago Acharya Panini had composed a book of grammar of Sanskrit language namely ' अष्टाध्यायी ' written in aphoristic style (सूत्रशैली). The book has covered the whole grammar of Sanskrit language in approximately four thousand aphorisms (सूत्रs) (in short sentences). As it is believed, in almost hundred or hundred and fifty years after Acharya Panini, Acharya Kartikeya has written वार्तिक (explicit explanations) on these aphorisms (सूत्रs). In these Vartikas deliberations have been done on these aphorisms. After another hundred or hundred and fifty years on the base of those aphorisms and Vartikas, Patanjali has composed a भाष्यग्रन्थ (a book of explanation) named महाभाष्य. The subject-matter of the present lesson has been chosen from this महाभाष्य.

Famous by the name of महाभाष्य this book of Acharya Patanjali is seemingly a book of grammar, even then during its certain incidents various principles of social, political and economical as well as those of physical science like astrology and geography have also been referred. These references indicate the extensiveness of the knowledge and science of that age.

In this present lesson the discussion over Panini's aphorism (सूत्र) स्थानेऽन्तरतमः (1. 1. 49) has shown how the suggestions have been made regarding the consent given to these principles in respect of the relations of the mutual behaviour of human beings, gravitation as well as that of the fire on the land incorporating with the Sun. This method of subjects of various scriptures in the book, discussing the grammar of language, provides inspiration to become an expert in multiple scriptures. A student, learning any one scripture should have the knowledge of the principles of various scriptures. Here this lesson is selected to provide inspiration for such skill.

संसारे विविधाः पदार्थाः सन्ति। तद्यथा, स्वर्ण-लौहादयो धातवः, वट-खदिरादयो वृक्षाः, गो-घोटकादयः पशवः च। एषु पुनः प्रत्येकमपि पदार्थाः भिन्नाः भिन्नाः भवन्ति। तद्यथा - स्वर्णं लौहात् भिन्नं भवति। अथ च प्रत्येकं सुवर्णखण्डः परस्परम् आकारेण प्रकारेण च भिन्नः भिन्नः भवति।

वस्तुतः अस्तित्वरूपेण सत्तारूपेण वा एते पदार्थाः परस्परं भिन्नाः सन्तीति प्रतीयन्ते। परन्तु प्रत्यक्षतः परस्परं भिन्नेषु पदार्थेषु अपि किञ्चिदेकं स्वाभाविकम् आन्तर्यमपि भवति। ते ते पदार्थाः यदा क्रियायां प्रयुक्ताः भवन्ति, तदा अस्य प्रतीतिः भवति। अस्य सिद्धान्तस्य उपदेशः द्वाविंशतिशतवर्षेभ्यः पूर्वम् आचार्येण पतञ्जलिना स्वकीये व्याकरणमहाभाष्ये कृतः। तत्र ते कथयन्ति -



'समाजेषु समाशेषु समवायेषु चास्यताम् इत्युक्ते नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः। येषामेव किंचिदर्थकृतमान्तर्यं तैरेव सहासते।' अर्थात् सामाजिके व्यवहारे भोजनार्थं निमन्त्रिताः जनाः आकारतः प्रकारतश्च भिन्नाः भिन्नाः भवन्ति। परन्तु यदा तेषां भोजनविधौ प्रवृत्तिः भवति, तदा ते स्वकीयम् आन्तरिकं समानत्वं पश्यन्तः परस्परं निकटासनाः भवन्ति। आकारेण कश्चित् कृशः जनः कृशेन सह न तिष्ठति, न तु कश्चित् पीनः पीनेन सह। परन्तु येषां किञ्चिदर्थकृतम् अर्थात् प्रयोजनकृतं सादृश्यं भवति, तत् सादृश्यमनुसरन्तः ते एव परस्परं निकटासनाः भवन्ति। मातुलकुलाः मातुलकुलैः सह, पितृव्याः पितृव्यैः सह, उपवेशिनः उपवेशिभिः सह तिष्ठन्ति।

एवमेव गवादीनां पशूनामपि प्रवृत्तिर्भवति। गावो दिवसं चरितवत्यो सायंकाले गोष्ठेषु समागत्य यो यस्याः वत्सो भवति तेन सह शेरते।

गवादीनामिव अचेतनेषु अपि पदार्थेषु नियमोऽयं दृश्यते। तद्यथा – लोष्टः क्षिप्तो बहुवेगं गत्वा नैव तिर्यग् गच्छति नोर्ध्वमारोहति। सः पृथिव्याः विकारः वर्तते इति कृत्वा पृथिवीमेव आगच्छति, सादृश्यत्वात्। तथा ज्योतिषो विकारः अर्चिः आकाशदेशे निवाते सुप्रज्वलितं नैव तिर्यग् गच्छति नार्वागारोहति। ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः।

एवमत्र महाभाष्यकाराः मानवीयं व्यावहारिकं सिद्धान्तमुपदिशन्ति। तेन सह च गुरुत्वाकर्षणस्य सिद्धान्तं पार्थिवाग्नेः सूर्येण सह सम्बन्धस्य च सिद्धान्तं सूचयन्ति।

## Glossary

**Noun : (Masc.) सिद्धान्तः** Principle, law (an opinion which is true and proven) **उपदेशः** moral, advice **समाजः** society **समाशः** having similar meal (food habits) **समवायः** conference, gathering **पाण्डु** yellowish pale colour (this word is used for a fair-skinned person) **मातुलः** maternal uncle **पितृव्यः** uncle (father's brother) **लोष्टः** lump of clay **निवातः** a place of space without wind

**(Fem.) प्रतीतिः** conviction **क्रिया** movement

**(Neu.) आन्तर्यम्** immediate proximity, similarity **गोष्ठेषु** in cowpens **अचेतनेषु** in non-living objects

**Pronoun : अस्य** (m.n.) his (m.n.) **येषाम्** (m.n.) whose (m. n. pl.)

**Adjective : विविधाः ( पदार्थाः )** different (objects) **भिन्नेषु ( पदार्थेषु )** in different (objects) **कृशः** thin **पीनः** fat **एकम् स्वाभाविकम् ( आन्तर्यम् )** natural similarity **सामाजिके ( व्यवहारे )** in social (dealing) **निमन्त्रिताः ( जनाः )** invited (people) **स्वकीयम् आन्तरिकम् ( समानत्वम् )** one's own internal (similarity) **प्रयोजनकृतम् ( सादृश्यम् )** (similarity) made purposely **गवादीनाम् ( पशूनाम् )** (of animals) cows etc. **अचेतनेषु ( पदार्थेषु )** in non-living (objects) **मानवीयं व्यावहारिकम् ( सिद्धान्तम् )** (principle) related to human affairs

**Adverb : तद्यथा** just as **नैव** not at all **अर्थात्** as a matter of fact, it means **आकारतः** in appearance **प्रकारतः** in kinds (quality) **तिर्यग्** oblique **ऊर्ध्वम्** above **इति कृत्वा** doing that **अर्वाक्** downward **आन्तर्यतः** due to similarity **अथ च** moreover

**Compound :** स्वर्ण-लौहादयः (स्वर्णं च लौहं च (-स्वर्णलौहे, इतरेतर द्वन्द्व), स्वर्णलौहे आदिः येषां ते – बहुव्रीहि)। वट-खदिरादयः (वटश्च खदिरश्च -वटखदिरौ, इतरेतर द्वन्द्व), वटखदिरौ आदिः येषाम् ते – बहुव्रीहि)। गो-घोटकायः (गौः च घोटकः च (-गोघोटकौ, इतरेतर द्वन्द्व), गोघोटकौ आदिः येषां ते – बहुव्रीहि)। अस्तित्वरूपेण (अस्तित्वं रूपं यस्य, तेन – बहुव्रीहि)। सत्तारूपेण (सत्ता रूपं यस्य, तेन – बहुव्रीहिः)। अर्थकृतम् (अर्थेन कृतम् – तृतीया तत्पुरुष)। भोजनविधौ (भोजनस्य विधिः, तस्मिन् – षष्ठी तत्पुरुष)। निकटासनाः (निकटे आसनानि येषां ते – बहुव्रीहि)। प्रयोजनकृतम् (प्रयोजनेन कृतम् – तृतीया तत्पुरुष)। मातुलकुलाः (मातुलं कुलं येषां ते – बहुव्रीहि)। अचेतनेषु (न चेतनम् – अचेतनम्, तेषु – नञ् तत्पुरुष)। आकाशदेशे (आकाशस्य देशः, तस्मिन् – षष्ठी तत्पुरुष)।

**Participle : ( क.भू.कृ. ) कृतः** did **निमन्त्रितः** invited **क्षिप्तः** thrown **सुप्रज्वलितम्** lighted well **( सं. भू. कृ. ) समागत्य** coming, approaching **गत्वा** going

**Root : First Gana (Parasmaipada) आ + रुह् ( आरोहति )** to climb, to ascend

**Tenth Gana (Parasmaipada) सूच् ( सूचयति )** to inform, to indicate

## Notes

**1. Meaning : स्वर्ण-लौहादयो धातवः** metals like gold, iron etc. **वट-खदिरादयो वृक्षाः** trees like banyan (fig), Khadira etc. **गो-घोटकादयः पशवः** beasts like cows, horses etc. **परस्परं भिन्नाः** different to each other **सत्तारूपेण भिन्नाः सन्तीति** are different in existance **प्रतीयन्ते** are ascertained **प्रत्यक्षतः** apparently **क्रियायां प्रयुक्ताः** used in action **द्वाविंशतिशतवर्षेभ्यः पूर्वम्** twenty-two hundred years ago **आचार्येण पतञ्जलिना** by Acharya Patanjali **स्वकीये व्याकरणमहाभाष्ये** in his book named Vyakarana Mahabhashya **आस्यताम् इति उक्ते** when it is said 'please sit' **नैव कृशाः कृशैः सह आसते** thin persons do not sit with thin ones **न पाण्डवः पाण्डुभिः** not pale (white) persons with pale ones **किञ्चित्** little **अर्थकृतम् आन्तर्यम्** immediate proximity (nearness) with some purpose **तैः एव सह आसते** sit with them only **भोजनविधौ प्रवृत्तिः भवति** when they are engaged in eating **समानत्वं पश्यन्तः** looking at similarity **परस्परम्** to each other **निकटासनाः** having a seat nearby **भवन्ति** become **आकारेण कश्चित् कृशः** someone thin in appearance/figure **पीनेन सह** with fat **किञ्चित् अर्थकृतम्** done with some purpose **तं सादृश्यम् अनुसरन्तः** following to that similarity **उपवेशिनः उपवेशिभिः सह तिष्ठन्ति** neighbours sit with neighbours **गावः दिवसं चरितवत्यः** cows, grazing for the whole day **यः यस्याः वत्सः भवति** that calf which is hers **तेन सह शेरते** sleeps with it **बहुवेगं गत्वा** going up with speed **नैव तिर्यग् गच्छति** does not go oblique **नोर्ध्वमारोहति** does not go upward **इति कृत्वा** doing that **पृथिवीमेव आगच्छति** comes down towards the earth **सादृश्यत्वात्** due to similarity **एवमेव** in that way **ज्योतिषो विकारः** light, the modification of the Sun **अर्चिः** ray of light **आकाशदेशे** in the sky **नार्वागारोहति** does not descend down **ज्योतिरेव गच्छत्यान्तर्यतः** goes towards light due to similarity **गुरुत्वाकर्षणस्य सिद्धान्तम्** to a law of gravitation **पार्थिवाग्नेः** of fire on the earth **सूर्येण सह** with the Sun **सम्बन्धस्य** of relation

**2. Sandhi :** स्वर्णादयो धातवः (स्वर्णादयः धातवः)। चास्यताम् (च आस्यताम्)। इत्युक्ते (इति उक्ते)। सहास्ते (सह आस्ते)। किञ्चिदर्थकृतमान्तर्यम् (किञ्चित् अर्थकृतम् आन्तर्यम्)। तैरेव (तैः एव)। सहासते (सह आसते)। प्रकारतश्च (प्रकारतः च)। सादृश्यमनुसरन्तः (सादृश्यम् अनुसरन्तः)। प्रवृत्तिर्भवति (प्रवृत्तिः भवति)। गावो दिवसम् (गावः दिवसम्)। यो यस्याः (यः यस्याः)। प्रसवो भवति (प्रसवः भवति)। नियमोऽयम् (नियमः अयम्)। क्षिप्तो बहुवेगम् (क्षिप्तः बहुवेगम्)। नोर्ध्वमारोहति (न ऊर्ध्वम् आरोहति)। ज्योतिषो विकारः (ज्योतिषः विकारः)। नार्वागारोहति (न अर्वाक् आरोहति)। ज्योतिषो विकारो ज्योतिरेव (ज्योतिषः विकारः ज्योतिः एव)। गच्छत्यान्तर्यतः (गच्छति आन्तर्यतः)।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) केन रूपेण पदार्थाः परस्परं भिन्नाः प्रतीयन्ते ? ◯

(क) आकारेण (ख) सत्तारूपेण (ग) मूल्येन (घ) प्रदेशरूपेण

(2) यदा पदार्थाः क्रियायां प्रयुक्ताः भवन्ति तदा कस्य प्रतीतिः भवति ? ◯

(क) सादृश्यस्य (ख) भिन्नतायाः (ग) आकारस्य (घ) प्रकारस्य

(3) स्वर्णादयः .................. सन्ति। ◯

(क) पशवः (ख) धातवः (ग) मनुष्याः (घ) भिन्नाः

(4) पतञ्जलेः स्थितिकालः कति वर्षेभ्यः पूर्वमस्ति ? ◯

(क) द्वाविंशतिशतवर्षेभ्यः पूर्वम् (ख) विंशतिसहस्रवर्षेभ्यः पूर्वम्

(ग) द्विसहस्रेभ्यः वर्षेभ्यः पूर्वम् (घ) शतेभ्यः वर्षेभ्यः पूर्वम्

(5) समाशेषु आस्यताम् इत्युक्ते कीदृशाः जनाः परस्परं निकटासनाः भवन्ति ? ◯

(क) आन्तरिकं समानत्वं पश्यन्तः (ख) आकारं पश्यन्तः

(ग) भारं पश्यन्तः (घ) पदवीं पश्यन्तः

**2. विशेष्यानुसारं विभक्तिवचनयुक्तम् उपयुक्तं विशेषणपदं रिक्तस्थाने लिखत ।**

(1) संसारे .............. पदार्थाः सन्ति। (विविध)

(2) .............. व्यवहारे भोजनार्थं जनाः निमन्त्रिताः। (सामाजिक)

(3) एवमेव .............. पशूनामपि प्रवृत्तिर्भवति। (गवादि)

(4) .............. व्यावहारिकं सिद्धान्तमुपदिशन्ति। (मानवीय)

(5) आकारेण कश्चित् कृशः .............. कृशेन .............. सह न तिष्ठति। (जन)

**3. एकवाक्येन संस्कृतभाषायाम् उत्तरत ।**

(1) परस्परं भिन्नेषु पदार्थेषु कीदृशम् आन्तर्यं भवति ?

(2) के निकटासनाः भवन्ति ?

(3) गोष्ठेषु गावः केन सह शेरते ?

(4) लोष्टः कस्य विकारः वर्तते ?

(5) पार्थिवाग्नेः केन सह सम्बन्धः वर्तते ?

**4. विसर्गसन्धिं प्रयोजयत।**

(1) स्वर्णादयः धातवः ..............................

(2) कृशैः सहास्ते ..............................

(3) तैः एव ..............................

(4) प्रकारतः च ..............................

(5) नियमः अयम् दृश्यते ..............................

**5. रेखाङ्कितपदानि आधृत्य प्रश्नवाक्यं रचयत ।**

(कुत्र, कैः, कस्याः, कस्य, कस्मात्)

(1) कृशा <u>कृशैः</u> सहासते।

(2) <u>गोष्ठेषु</u> समागत्य यो यस्याः प्रसवो भवति तेन सह गावः शेरते।

(3) सः <u>पृथिव्याः</u> विकारः वर्तते।

(4) महाभाष्यकारः <u>सम्बन्धस्य</u> सिद्धान्तं सूचयति।

**6. आङ्ग्लभाषायाम् उत्तराणि लिखत ।**

(1) What is the reason for natural similarity of living beings ?

(2) Why similarity is seen in non-living objects ?

(3) Why does light go upwards ?

**Activity**

- Collect the names of writers and their work based on Sanskrit scientific literature.

# 18. मुक्तानि मुक्तकानि

Various kinds of entertaining and logically intelligent independent verses (Muktakas) like riddles, puzzles, internal dialogues and series of questions-answers have been composed in ample numbers in Sanskrit literature. In this composition of independent verses wonder is created by using sometimes pun and sometimes additions juncture (सन्धि). Sometimes wonder is created to make double meaning by changing compound and at another time by changing the connection of words (अन्वय).

Composition of such independent verses have not been made as a single book but such independent verses have been composed by learned poets at different times in different regions. They have been collectd in different books. At present, they have been published as 'सुभाषितरत्नभाण्डागार'.

In the present lesson, creating various wonders in different ways the collection of eight verses has been done. It is not that such wonders are only for entertainment. Creating wonders by words and by meanings these verses also preach how to make human life best. By living life as per this preaching human being can get success everywhere and make his life happier.

पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता।
पवर्गरचिता मूर्तिरपवर्गप्रदास्तु वः ॥ 1 ॥

भगवन् किमुपादेयं गुरुवचनम्, हेयमपि च किमकार्यम्।
को गुरुरधिगततत्त्वः, शिष्यहितायोद्यतः सततम् ॥ 2 ॥

अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने।
शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः ॥ 3 ॥

शस्त्रं न खलु कर्तव्यमिति पित्रा नियोजितः।
तदेव शस्त्रं कृतवान् पितुराज्ञा न लङ्घिता ॥ 4 ॥

वृक्षस्याग्रे फलं दृष्टं फलाग्रे वृक्ष एव च।
अकारादि सकारान्तं यो जानाति स पण्डितः ॥ 5 ॥

यथा नयति कैलासं नगं गानसरस्वती।
तथा नयति कैलासं न गङ्गा न सरस्वती ॥ 6 ॥

युधिष्ठिरः कस्य पुत्रो गङ्गा वहति कीदृशी।
हंसस्य शोभा का वास्ति धर्मस्य त्वरिता गतिः ॥ 7 ॥

द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः ॥ 8 ॥

## Glossary

**Noun : (Masc.) उद्यतः** ready, prepared **कान्तः** favourite **शः** letter 'श' **नगः** mountain **कैलासः** Kailasa, name of a mountain **द्वन्द्वः, द्विगुः, अव्ययीभावः, तत्पुरुष, कर्मधारय, बहुव्रीहिः** these are types/ names of compounds. Some of these kind of compounds you have studied in IX class. Others are discussed in अभ्यास - 5 of Grammar section. (Every word has its own meaning e.g. **द्वन्द्वः** pair, couple, **द्विगुः** collection of two, one having two cows **अव्ययीभावः** where there is absence of expendture **तत्पुरुष** If we dissolve the word using different cases, different meanings are obtained.- पुरुष of that particular case. Here, we dissolve it as तत्पुरुष समास. कर्मधारय is divided in two parts कर्म and धारय. which means 'do the work'. बहुव्रीहिः one having lots of व्रीहि - grains. This word is an example of बहुव्रीहि समास.

**(Fem.) पवर्गरचिता मूर्तिः** idol made up of 'प' वर्ग i.e. letters प, फ, ब, भ, म. (The devotee has created in his mind an idol of God by using the words like पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता beginning with letters of 'प' वर्ग, which are used in first half of the verse.) **अपवर्गप्रदा** अपवर्ग means salvation (मोक्ष-salvation) प्रदा giver (In the first half of the verse the idol imagined is made up of 'प' वर्ग. But अपवर्ग (salvation) is asked from 'प' वर्ग which is contradictory. But here अपवर्ग is in sense of salvation.) **न लङ्घिता** did not cross **गानसरस्वती** Sarasvati in the form of song **गंगा, सरस्वती** famous rivers having these name (One is confused on listening this verse but one can undetstand the meaning by pondering over it. Read नगं गानसरस्वती and न गङ्गा न सरस्वती and the meaning becomes clear.)

**(Neu.) अकार्यम्** not worth doing **नखलु** nail-cutter (Separate the words न खलु as न – not and खलु – indeed) (Sometimes खलु does not show any meaning but adds charm to a sentence.)

**Pronoun : कस्य** (m.n.) whose **का** (f.) who

**Adjective : पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता** having a bow named Pinaka, Cobra, moon of second day of the bright half, ashes and river Ganga (starting with letter प, फ, ब, भ and म) **उपादेयम्** worth accepting **हेयम्** worth abandoning **अधिगततत्त्वः** one, who knows the essence (secret) **त्वरिता** quick

**Adverb : अनन्तरम्** there after **खलु** indeed, certainly **इति** in this way

**Compound :** पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता (पिनाकः च फणी च बालेन्दुः च भस्म च मन्दाकिनी च इति पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिन्यः (इतरेतर द्वन्द्व), पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीभिः युता - तृतीया तत्पुरुष)। पवर्गरचितामूर्तिः (पवर्गेण रचिता पवर्गरचिता (तृतीया तत्पुरुष), पवर्गरचिता चासौ मूर्तिः - कर्मधारय)। गुरुवचनम् (गुरोः वचनम् - षष्ठी तत्पुरुष)। अकार्यम् (न कार्यम् - नञ् तत्पुरुष)। अधिगततत्त्वः (अधिगतं तत्त्वं येन सः - बहुव्रीहि)। शिष्यहिताय (शिष्यस्य हितम्, तस्मै - षष्ठी तत्पुरुष)। कमललोचने (कमले इव लोचने यस्याः सा बहुव्रीहि)। नखलु (नखं लुनाति (लुनीते) - उपपद तत्पुरुष)। फलाग्रे (फलस्य अग्रम्, तस्मिन् - षष्ठी तत्पुरुष)। अकारादिसकारान्तम् (अकारः आदिः यस्य तत्, अकारादि - बहुव्रीहि। सकारः अन्ते यस्य तत्, सकारान्तम् - बहुव्रीहि। अकारादि च सकारान्तं च - समाहार द्वन्द्व)। गानसरस्वती (गानस्य सरस्वती - षष्ठी तत्पुरुष)।

**Root : (First Gana) (Parasmaipada) वह् ( वहति )** to carry

## Notes

